東洋文化研究所紀要 第169冊
平 成 28 年 3 月 抜 刷

# A Critical Edition of the *Prāmāṇya* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī*

Kei Kataoka

# A Critical Edition of the *Prāmāṇya* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī*

Kei KATAOKA

## Introduction

Bhaṭṭa Jayanta's *Nyāyamañjarī* is divided into twelve chapters (*āhnika*). He comments only on definition sūtras of the *Nyāyasūtra* among the three types of sūtras, i.e. those for enumeration (*uddeśa*), definition (*lakṣaṇa*), and investigation (*parīkṣā*), as he states in the beginning: "I will comment on definition sūtras alone" (NM I 30: *asmābhis tu lakṣaṇasūtrāṇy eva vyākhyāsyante*). The following table shows the division of chapters, corresponding sūtras, and page numbers of the Mysore edition.[1] Jayanta allots four chapters, i.e. the third up to sixth, to *Nyāyasūtra* 1.1.7.

| āhnika | sūtra | | Mysore |
|---|---|---|---|
| I | | Introduction | I 1 |
| | 1.1.1 | Enumeration of the 16 categories (*padārtha*) | I 12 |
| | 1.1.3 | Definition of *pramāṇa*; subdivision into 4 kinds | I 31 |
| II | 1.1.4 | Definition of perception (*pratyakṣa*) | I 171 |
| | 1.1.5 | Definition of inference (*anumāna*) | I 282 |
| | 1.1.6 | Definition of comparison (*upamāna*) | I 373 |
| **III** | **1.1.7** | **Definition of verbal testimony (*śabda*)** | **I 396** |
| IV | | The Veda | I 573 |
| V | | Word-meaning (*padārtha*) and sentence-meaning (*vākyārtha*) | II 3 |

1 See Kataoka 2010:18 and Watson and Kataoka 2010:286.

| | | | |
|---|---|---|---|
| VI | | Sentence-meaning (*vākyārtha*) | II 143 |
| VII | 1.1.9 | Definition of *prameya*; subdivision into 12 kinds | II 263 |
| | 1.1.10 | The self (*ātman*) | II 278 |
| VIII | 1.1.11–21 | The body up to suffering (*śarīra … duḥkha*) | II 360 |
| IX | 1.1.22 | Liberation (*mokṣa*) | II 430 |
| X | 1.1.23–39 | Doubt up to the final conclusion (*saṃśaya … nigamana*) | II 522 |
| XI | 1.1.40–1.2.17 | Hypothetical reasoning up to unfair reply (*tarka … chala*) | II 584 |
| XII | 1.2.18 | Generality based on a false analogy (*jāti*) | II 645 |
| | 5.1.1–43 | Subdivision into 24 kinds | II 646 |
| | 1.2.19–20 | Grounds for defeat in debate (*nigrahasthāna*) | II 677 |
| | 5.2.1–24 | Subdivision into 22 kinds | II 679 |

Validity (*prāmāṇya*) is discussed in the third chapter, where Jayanta comments on the definition sūtra of verbal testimony (*śabda*), namely, *Nyāyasūtra* 1.1.7: "Verbal testimony is [defined as] a teaching by a reliable person" (*āptopadeśaḥ śabdaḥ*). The ultimate goal of the entire Nyāya teaching, according to Jayanta, is to prove the validity of the Veda (*vedaprāmāṇyasiddhi*)(2), protect its authoritativeness (*vedaprāmāṇyarakṣā*)(3), and thus provide full confidence in its authoritativeness through crushing all bad philosophers (*duṣṭatārkika*) such as Buddhists. Only then will good people care about the Vedic performance which is accomplished through spending a lot of money, energy and so on(4). As "the

2　NM I 401.1.

3　NM I 7.7–8, Kataoka 2007:179(148).2–3: *nyāyavistaras tu mūlastambhabhūtaḥ sarvavidyānām, vedaprāmāṇyarakṣāhetutvāt.* "*Nyāyavistara* [taught by Akṣapāda], on the other hand, is the basic trunk of all branches of science, because it is a means for protecting the Vedas' authoritativeness." (Translation in Kataoka 2006:163–164.)

4　NM I 7.11–14, Kataoka 2007:179 (148). 7–178(149). 1: *tasmād aśeṣaduṣṭatārkikopamard-advārakadṛḍhataravedaprāmāṇyapratyayādhāyinyāyopadeśakṣamam akṣapādopadiṣṭam*

philosophy" (*tarka*) of the fourteen branches of science (*caturdaśa vidyāsthānāni*) centering around the four Vedas and also as "the reflection" (*ānvīkṣikī*) among the four types of science (*caturvidyāḥ*)(5), Akṣapāda's teaching alone can provide the logic (*nyāya*) for providing belief in the Veda. As shown in Jayanta's third, alternative interpretation of *Nyāyasūtra* 1.1.7, the Veda is proved to be valid because it is authored by the most reliable one, i.e. the omniscient creator, God, who directly perceives dharma(6). The present section on validity provides a foundation for this proof by generally establishing that validity is extrinsic (*parataḥ*) and not intrinsic (*svataḥ*). Jayanta regards the Mīmāṃsā doctrine of intrinsic validity as being too weak to protect the authoritativeness of the Veda(7).

---

*idaṃ nyāyavistarākhyaṃ śāstraṃ śāstrapratiṣṭhānanibandhanam iti dhuryaṃ vidyāsthānam.* "Therefore this teaching called Nyāyavistara taught by Akṣapāda, which is capable of teaching logic that provides a firmer faith in the authoritativeness of the Vedas through crushing all bad philosophers, is the base for establishing [all] teachings; thus it is the most responsible branch of science." (Translation in Kataoka 2006:164.)

5 See introduction in Kataoka 2007:202(125)–200(127).

6 NM I 401.1–3: *atha vā vedaprāmāṇyasiddhyarthatvāc chāstrasya tatpraṇetur āptasyeśvarasya yathāśrutam evedaṃ lakṣaṇam. sa sākṣātkṛtadharma eva, dharmasyeśvarapratyakṣagocaratvāt.* "Or because the [Nyāya] teaching is for the sake of establishing the Vedas' authoritativeness, this definition [can be interpreted] literally as referring to God, i.e. the reliable author of those [Vedas]. He is one who has perceived [and therefore reached] dharma directly [i.e. fulfils the definition of an *āpta*], because dharma is an object of God's perception." (Translation in Kataoka 2006:165.)

7 Kataoka 2006:169–172. See, in particular, NM I 10.6–8, Kataoka 2007:174 (153). 8–173 (154). 1: *na ca mīmāṃsakāḥ samyagvedaprāmāṇyarakṣaṇakṣamāṃ saraṇim avalokayituṃ kṣamāḥ. kutarkakaṇṭakanikaraniruddhasañcāramārgābhāsaparibhrāntāḥ khalu ta iti vakṣyāmaḥ.* "And Mīmāṃsakas are not able to find a path which makes it possible to protect well the validity of the Vedas. As we will state later, they are indeed wandering on the wrong path, a narrow road obstructed by a mass of thorns of bad speculation." (Translation in Kataoka 2006:170.)

“For without a confirmation by means of an agreement with another *pramāṇa*, even perception etc. do not become valid, not to say this speech, which operates in dependence on them. ... But in order to determine whether or not the meaning is true, it is inevitable [i.e. necessary] to consider the person’s face in the case of this [speech]. Therefore, speech becomes valid only on the basis of being spoken by a reliable person (*āptoktatvād eva*), and not in other ways. And this will be explained in this same teaching.”(8) The third chapter provides general theories for establishing the validity of speech, whereas the fourth chapter lays out various doctrines and discussions mainly related to the Veda. These two chapters are divided into subsections as shown in the following table(9). This table confirms that the present section (III-5) is one of the prerequisites for proving the validity of the Veda (VI-3).

| III | | |
|---|---|---|
| 1 | Interpretation of *Nyāyasūtra* 1.1.7 | I 396 |
| 2 | Verbal testimony (*śabda*) is an independent, separate *pramāṇa* | I 401 |
| 3 | Enumeration of faults (*doṣa*) | I 412 |
| 4 | Refutation of the Buddhist view that speech does not touch objects | I 415 |
| **5** | **Validity (*prāmāṇya*)** | **I 419** |
| | **Pūrvapakṣa: intrinsic validity** | **I 420** |
| | **Siddhānta: extrinsic validity** | **I 435** |
| 6 | Error | I 451 |
| 7 | Extrinsic validity of speech | I 481 |
| 8 | Proof of God (*īśvara*) | I 484 |

8 NM I 10.8–11.2, Kataoka 2007:173 (154). 1–6: *na hi pramāṇāntarasaṃvādadārḍhyam antareṇa pratyakṣādīny api pramāṇabhāvaṃ bhajante, kim uta tadadhīnavṛttir eṣa śabdaḥ. ... arthatathātvetaratvapariniścaye tu puruṣamukhaprekṣitvam asyāparihāryam. tasmād āptoktatvād eva śabdaḥ pramāṇībhavati, nānyatheti. etac cāsminn eva śāstre vyutpādayiṣyate.* Translation in Kataoka 2006:172.

9 Kataoka 2010:19, Freschi and Kataoka 2012:4, and Kataoka 2015:50.

| | | |
|---|---|---|
| 9 | Non-eternity of speech | I 513 |
| IV | | |
| 1 | The Lord as the author of the Veda | I 573 |
| 2 | The Lord as the author of the connection of words and meanings | I 591 |
| 3 | The Veda's validity as being taught by a reliable one (*āptoktatva*) | I 603 |
| 4 | The Atharvaveda's validity | I 614 |
| 5 | The validity of all sacred texts | I 629 |
| 6 | Faults of the Veda | I 649 |
| 7 | *Arthavāda*s, *mantra*s and *nāmadheya*s | I 667 |
| 8 | Ultimate meaning of the Veda | I 691 |

As Jayanta states in the opening verse of the present section, validity and invalidity in respect to all cognition (§ 1: *prāmāṇyam aprāmāṇyaṃ vā sarvavijñānagocaram*) is discussed in this section. Jayanta's main target of criticism, as is usually the case, is again Kumārila, a Mīmāṃsā scholar active around the first half of the seventh century (600–650 AD), who claims that validity is intrinsic and invalidity is extrinsic. Jayanta first presents Kumārila's (and his followers') view and then establishes his own view that both validity and invalidity are extrinsic. In order to evaluate Jayanta's view of validity from the historical perspective, we probably need to take into consideration at least the following scholars if we limit ourselves to the history up to Jayanta. Umbeka, a commentator of the oldest extant commentary to the present chapter of Kumārila's *Ślokavārttika*,[10] is of particular importance, because his discussions are echoed by Jayanta in the present section as shown in the apparatus.

500 Vṛttikāra
Śabara

10 The date of Jayamiśra, the author of the *Śarkarikā* and another apparently old commentator, is not fixed yet. Its edition (based on a single manuscript) covers only *ākṛti, apoha, vana,* and *saṃbandhākṣepaparihāra*.

| | | | |
|---|---|---|---|
| 600 | Kumārila 600-650 | | |
| | | Dharmakīrti 600-660 | |
| | | Devendrabuddhi 630-690 | |
| 700 | Maṇḍana 660-720 | Śākyabuddhi 660-720 | |
| | Umbeka 730-790 | Śāntarakṣita 725-788 | |
| | | Dharmottara 740-800 | |
| | | Kamalaśīla 740-795 | |
| 800 | | | |
| 900 | | | Jayanta |

## Translations and Studies

The present section (based on a previous edition) is covered by an English translation by Bhattacharyya 1978:333–366. Nagin Shah translates it into Gujarati in Shah 1984:22–55 and gives a summary in Shah 1995:109–121. A Japanese translation by Uno 1996:364–402 is also available. A general study on *prāmāṇya* is done by Śāstrī 1993 in Hindi.

## Analysis of the framework of the text

In the *pūrvapakṣa* section (§3), Jayanta gives a summary of the Bhāṭṭa discussion of validity which is organized as follows:

| section | *prāmāṇyam* | *aprāmāṇyam* |
|---|---|---|
| 3.1 | *svataḥ* | *svataḥ* |
| 3.2 | *svataḥ* | *parataḥ* |
| 3.3 | *parataḥ* | *parataḥ* |
| 3.4 | *svataḥ* | *parataḥ* |

The main target of the Bhāṭṭa criticism is the third view, i.e. the Naiyāyika view, that both validity and invalidity are extrinsic. Jayanta systematically reorganizes

the arguments from three perspectives, i.e. in terms of arising ("Validity requires something else when arising"), carrying out its own task ("A valid cognition carries out its own task, i.e. illuminating an object, by means of something else"), and ascertainment of validity ("A valid cognition requires something else in order to ascertain its validity").

| section | *prāmāṇyaṃ parataḥ* | |
|---|---|---|
| 3.3.1 | *utpattau* | *utpattau prāmāṇyaṃ param apekṣate* |
| 3.3.2 | *svakāryakaraṇe* | *svakāryakaraṇe pramāṇaṃ param apekṣate* |
| 3.3.3 | *prāmāṇyaniścaye* | *prāmāṇyaniścaye pramāṇaṃ param apekṣate* |

After criticizing the Naiyāyika view, Bhāṭṭas present their own view that validity is intrinsic and invalidity is extrinsic with the terms *autsargikam* (by principle[11]) and *apavāda* (exception). A result of a valid cognition, i.e. ascertainment (*paricchitti,* literary "cutting out"), has validity by principle, which can be cancelled only exceptionally (*apodyate*).

| | | |
|---|---|---|
| 3.4.2 | *prāmāṇyaṃ svataḥ* | *pramāṇakāryam autsargikam prāmāṇyaṃ bhajate* |
| 3.4.3 | *aprāmāṇyaṃ parataḥ* | *yatra prāmāṇyāpavādas tatrāprāmāṇyam* |

In the *siddhānta* section (§4) Jayanta first criticizes the Bhāṭṭa view of intrinsic validity from four perspectives, i.e. in terms of grasping ("It is not the case that a valid cognition grasps its validity for itself), arising ("It is not the case that validity of a valid cognition arises of itself"), carrying out its own task ("It is not the case that a valid cognition does not depend on something else when carrying out its own task"), and ascertainment of validity ("It is not the case that a valid cognition does not depend on something else when ascertaining its validity"). In the third and fourth perspectives *svataḥ* ("by itself") is construed as equivalent to *na*

11 Cf. *Tattvasaṃgrahapañjikā* 919.19–20: *utsargaḥ sāmānyena vidhānam, tatra bhavam autsargikam.*

*parataḥ* ("not by means of something else").

| section | *na prāmāṇyaṃ svataḥ* | |
|---|---|---|
| 4.2.1 | *grahaṇe* | *na svayam eva pramāṇam ātmanaḥ prāmāṇyaṃ gṛhṇāti* |
| 4.2.2 | *utpattau* | *na svata eva pramāṇasya prāmāṇyaṃ bhavati* |
| 4.2.3 | *svakāryakaraṇe* | *na pramāṇaṃ svakāryakaraṇe nirapekṣam* |
| 4.2.4 | *prāmāṇyaniścaye* | *na prāmāṇyaniścaye pramāṇaṃ nirapekṣam* |

What is the difference between the two views criticized in the first and the fourth sections? In both cases Bhāṭṭas claim that validity is cognized for itself (*prāmāṇyaṃ svato jñāyate*). According to the first view validity is grasped for itself (*svayaṃ prāmāṇyaṃ gṛhyate*), whereas according to the fourth validity is ascertained (*niścīyate*). In the *pūrvapakṣa* section, however, only ascertainment (*niścaya*) was questioned.

The following is a probable solution. Both take up the same issue, i.e. ascertainment of validity questioned in the *pūrvapakṣa*. In the *pūrvapakṣa*, however, Bhāṭṭas did not make a strong claim that a valid cognition ascertains its validity for itself (*svataḥ*). Rather they made a weak claim that a valid cognition does not require something else (*na parataḥ*, *nirapekṣa*, *parānapekṣa*) in order to ascertain its validity. Jayanta refutes both claims, including a claim not explicitly made by the opponent, in the *siddhānta*.

| | *pūrvapakṣa* | | *siddhānta* |
|---|---|---|---|
| ---- | *(pramāṇaṃ* ***svataḥ*** *prāmāṇyaṃ niścinoti)* | 4.2.1 | *na pramāṇaṃ* ***svataḥ*** *prāmāṇyaṃ gṛhṇāti (niścinoti)* |
| 3.3.3 | *pramāṇaṃ* ***na parataḥ*** *prāmāṇyaṃ niścinoti* | 4.2.4 | *na pramāṇaṃ* ***na parataḥ*** *prāmāṇyaṃ niścinoti* |

After having refuted the Bhāṭṭa view of intrinsic validity, Jayanta (in section 4.3) defends his view of extrinsic validity from the criticism by the Bhāṭṭas and establishes that validity of a cognition of an object is ascertained by another

cognition which confirms the efficacy of the object in question (*arthakriyājñānāt prāmāṇyaniścayaḥ*). As the final part of this discussion, he criticizes another view, which we can trace in the works of Devendrabuddhi and Śākyabuddhi, and which Kamalaśīla calls *aniyamapakṣa*.[12]

## Consulted editions and manuscripts

Following the detailed study of *Nyāyamañjarī* manuscripts by Graheli 2011, I omit in the present edition less important manuscripts that I used to consult in my previous editions.

M *Nyāyamañjarī of Jayantabhaṭṭa with Ṭippaṇi — Nyāyasaurabha by the Editor.* Ed. K.S. Varadācārya. 2 vols. Mysore: Oriental Research Institute, 1969, 1983.

- $M^{ka}$ Variants reported in M as *ka*, a paper manuscript preserved in the Oriental Research institute, Mysore, according to the *prastāvanā* of the first volume.
- $M^{kha}$ Variants reported in M as *kha*, a published text (*mudritakośa*).
- $M^{ga}$ Variants reported in M as *ga*, a transcript owned by Ātmakūru Dīkṣācārya, according to the *prastāvanā* in the first volume.
- $M^{en}$ Variants reported in M (containing those of the Allahabad manuscript and the editor's own corrections) given in the end of the first volume as *pāṭhāntarāṇi*.

V *The Nyāyamañjarī of Jayanta Bhaṭṭa*. 2 parts. Ed. Gaṅgādhara Śāstrī Tailaṅga. Vizianagaram Sanskrit Series, No. 10. Benares: E.J. Lazarus & Co., 1895, 1896.

$K_1$ A manuscript preserved in the Malayalam Department of the University of Calicut, No. 2602. Malayalam script. Palm leaf. 188 folios. Incomplete.

$L_1$ A manuscript preserved in the Akhila Bharatiya Sanskrit Parishad,

12 Kataoka 2011: II 236-237, n. 176; 285-286, n. 277.

Lucknow, Serial No. 27E, Access No. 2381. Śāradā script. Paper. 138 folios. Incomplete.

See Kataoka 2003 for other abbreviations and conventions in the present edition.

## Acknowledgment

I thank Dominic Goodall and S.A.S. Sarma for their help in obtaining copies of manuscripts. I am indebted to the following institutes for giving me permission to consult manuscripts: The Malayalam Department of the University of Calicut, Calicut; and the Akhila Bharatiya Sanskrit Parishad, Lucknow. Last but not least, I am much obliged to Peter Sahota and Suguru Ishimura for their comments on my draft. The complex typesetting of the present edition is made possible thanks to the EDMAC macros developed by John Lavagnino and Dominik Wujastyk.

## Abbreviations and Bibliography

*Jaiminisūtra* See Frauwallner 1968.

*Tattvasaṃgraha/pañjikā*: *Tattvasangraha of Ācārya Shāntarakṣita with the Commentary Pañjikā of Shri Kamalashīla.* Vol. 2. Ed. Swami Dwarikadas Shastri. Varanasi: Bauddha Bharati, 1982.

*Tātparyaṭīkā*: *Ślokavārttikavyākhyā Tātparyaṭīkā of Uṃveka Bhaṭṭa.* Ed. S.K. Rāmanātha Śāstrī. Rev. K. Kunjuni Raja & R. Thangaswamy. Madras: University of Madras, $^{2}$1971. (=ed.)
A manuscript preserved in the Sarasvatī Bhavan Library, Sampurnananda Sanskrit University, No. 29323. Devanāgarī. Paper. Incomplete. 206 folios. (=ms.)

*Nyāyamañjarī*: *Nyāyamañjarī* of Jayantabhaṭṭa with *Ṭippaṇī – Nyāyasaurabha* by the Editor. Ed. K.S. Varadācārya. 2 vols. Mysore: Oriental Research Institute, 1969, 1983. (=NM)

*Nyāyamañjarīgranthibhaṅga*: *Nyāyamañjarīgranthibhaṅga.* Ed. Nagin J.

Shah. Ahmedabad: L.D. Institute of Indology, 1972.

*Nyāyasūtra:* *Gautamīyanyāyadarśana with Bhāṣya of Vātsyāyana*. Ed. Anantalal Thakur. New Delhi: Indian Council of Philosophical Research, 1997.

*Nyāyabhāṣya*: *Gautamīyanyāyadarśana with Bhāṣya of Vātsyāyana*. Ed. Anantalal Thakur. New Delhi: Indian Council of Philosophical Research, 1997.

*Mahābhārata*: *The Mahābhārata*. Ed. V.S. Sukthankar et al. Poona: Bhandarkar Oriental Research Institute, 1927-59.

*Viṃśikāvṛtti*: See Anacker 1994.

*Vidhiviveka*: *Vidhivivekaḥ of Maṇḍanamiśra with Commentary, Nyāyakaṇikā, of Vācaspatimiśra, and Supercommentaries, Juṣadhvaṅkaraṇī and Svaditaṅkaraṇī, of Parameśvaraḥ, Critical and Annotated Edition: the Pūrvapakṣaḥ*. Ed. Elliot M. Stern. 4 parts. Dissertation submitted to the University of Pennsylvania, 1988.
For the latter half (*Uttarapakṣa*), I consult an edition that Dr. Stern prepares for publication.

*Śābarabhāṣya:* See Frauwallner 1968 (=F).

*Ślokavārttika*: See Kataoka 2011 for *codanā* chapter.

Anacker, Stefan 1994: *Seven Works of Vasubandhu: The Buddhist Psychological Doctor.* Delhi: Motilal Banarsidass.

Bhattacharyya, J.V. 1978: *Nyāya-Mañjarī. The Compendium of Indian Speculative Logic.* Vol. 1. Delhi: Motilal Banarsidass.

Frauwallner, Erich 1968: *Materialien zur ältesten Erkenntnislehre der Karmamīmāṃsā.* Wien: Hermann Böhlaus Nachf.

Freschi, Elisa and Kei Kataoka 2012: "Jayanta on the Validity of Sacred Text (Other than the Veda)." *South Asian Classical Studies*, 7, 1–55.

Graheli, Alessandro 2011: "The Choice of the Best Reading in Bhaṭṭa Jayanta's Nyāyamañjarī." *Rivista Degli Studi Orientali (Nuova Serie)*, 84, 107–122.

Inami, Masahiro 1993: "Bukkyō Ronrigakuha no Shinriron: Devendrabuddhi and Śākyabuddhi." In: Watanabe Fumimaro Hakase Tsuitō Kinen Ronshū: Genshi-bukkyō to Daijō-bukkyō Ge, 85–118.

Kataoka, Kei 2003: "Critical Edition of the *Vijñānādvaitavāda* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī*." *The Memoirs of the Institute of Oriental Culture*, 144, 318(115)–278(155).

———2006: "Bhaṭṭa Jayanta on the Purpose of Nyāya." *South Asian Classical Studies*, 1, 147–174.

———2007: "Critical Edition of the *Śāstrārambha* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī*." *The Memoirs of the Institute of Oriental Culture,* 204(123)–170(157).

———2010: "A Critical Edition of Bhaṭṭa Jayanta's *Nyāyamañjarī*: Jayanta's View on *Jāti* and *Apoha*." *The Memoirs of Institute for Advanced Studies on Asia*, 158, 220(61)–168(113).

———2011: *Kumārila on Truth, Omniscience, and Killing. Part 1: A Critical Edition of Mīmāṃsā-Ślokavārttika ad 1.1.2 (Codanāsūtra). Part 2: An Annotated Translation of Mīmāṃsā-Ślokavārttika ad 1.1.2 (Codanāsūtra)*. Verlag der Österreichischen Akademie der Wissenschaften.

———2015: "Bukkyō no Fuhen Hihan." *Tetsugaku Nenpō*, 74, 49–117. (My articles are available at "http://www.k4.dion.ne.jp/~sanskrit/WorksJ.html")

Śāstrī, Śukadev 1993: *Prāmāṇyavāda Samīkṣā*. Udaipur: Shiva Publishers Distributers.

Shah, Nagin 1984: *Jayanta Bhaṭṭa's Nyāyamañjarī [Tṛtīya Āhnika] with Gujarati Translation*. Ahmedabad: L. D. Institute of Indology.

———1995: *A Study of Jayanta Bhaṭṭa's Nyāyamañjarī. A Mature Sanskrit Work on Indian Logic.* Part II. Sanskrit-Sanskriti Granthamālā 3. Ahmedabad.

Steinkellner, Ernst 1981: "Philological Remarks on Śākyamati's Pramāṇavārttikaṭīkā," *Studien zum Jainismus und Buddhismus*,

283–295.
Uno, Atsushi 1996: *Indo Ronrigaku*. Kyoto: Hōzōkan.
Watson, Alex and Kei Kataoka 2012: "Bhaṭṭa Jayanta's Refutation of the Yogācāra Buddhist Doctrine of Vijñānavāda: Annotated Translation and Analysis." *South Asian Classical Studies*, 5, 285–352.

## Synopsis

1 viṣayaḥ
2 prakaraṇasaṃbandhaḥ
3 kaumārilamatopanyāsaḥ
  3.1 dvayam api svataḥ
  3.2 aprāmāṇyaṃ svataḥ prāmāṇyaṃ parataḥ
    3.2.1 nāprāmāṇyaṃ svataḥ
      3.2.1.1 pravṛttir na prāpnoti
      3.2.1.2 aprāmāṇyaṃ parāpekṣam
      3.2.1.3 aprāmāṇyaṃ vastv eva
    3.2.2 na prāmāṇyaṃ parataḥ
  3.3 dvayam api parataḥ
    3.3.1 utpattau
      3.3.1.1 kārakasvarūpamātrāpekṣāyām
      3.3.1.2 kārakātiriktatadadhikaraṇaguṇāpekṣāyām
        3.3.1.2.1 guṇapramāṇābhāvaḥ (→4.2.2.3)
        3.3.1.2.2 doṣābhāvaḥ
          3.3.1.2.2.1 upalabdhitraividhyābhāvaḥ
          3.3.1.2.2.2 aprāmāṇyaṃ doṣāt
          3.3.1.2.2.3 prāmāṇyaṃ svarūpāt
          3.3.1.2.2.4 doṣanirharaṇāya (→4.2.2.3)
      3.3.1.3 upasaṃhāraḥ
    3.3.2 svakāryakaraṇe (→4.2.3)
    3.3.3 prāmāṇyaniścaye

3.3.3.1 na kāraṇaguṇajñānāt prāmāṇyaniścayaḥ
3.3.3.1.1 nirastatvāt
3.3.3.1.2 cakrakapātaḥ (→4.3.1.1, 4.3.1.2)
3.3.3.2 bādhakābhāvajñānāt
3.3.3.3 saṃvādāt
3.3.3.3.1 jñānamātram
3.3.3.3.2 arthāntarajñānam
3.3.3.3.3 arthakriyājñānam
3.3.3.3.3.1 viśeṣābhāvād anavasthāprasaṅgaḥ (→4.3.2.2)
3.3.3.3.3.1.1 arthakriyājñānasyāpi svapne vyabhicāraḥ (→4.3.2.2.3)
3.3.3.3.3.1.2 caramadhātuvisargaḥ
3.3.3.3.3.1.3 upasaṃhāraḥ (→4.3.2.2)
3.3.3.3.3.2 vaiyarthyam (→4.3.1, 4.3.1.2, 4.3.2.2.6)
3.3.3.3.3.3 vaiyarthyaparihāraḥ (→4.4)
3.3.3.3.3.4 tathāvidhatvaniścayaprakāraḥ
3.3.3.3.4 kāraṇajñānam (→4.3.1, 4.3.1.1)
3.3.3.4 prāmāṇyaniścayābhāvopasaṃhāraḥ
3.3.4 prāmāṇyaparatastvābhāvopasaṃhāraḥ
3.3.5 aprāmāṇyasvatastvābhāvaḥ
3.4 prāmāṇyaṃ svato 'prāmāṇyaṃ parataḥ
3.4.1 niścayaḥ parataḥ
3.4.2 prāmāṇyam autsargikam (→4.2.1.3.2.3)
3.4.3 apavādadvaividhyam
3.4.3.1 bādhakajñānam
3.4.3.2 kāraṇadoṣajñānam
3.4.3.3 apavādāśaṅkā
3.4.3.3.1 śaṅkāyā abhāvaḥ (→4.2.1.3.2.5)
3.4.3.3.2 tṛtīyajñānasaṃvādaḥ
3.4.4 śabdaprāmāṇyam
3.4.4.1 prāmāṇyaṃ svataḥ
3.4.4.2 aprāmāṇyaṃ parataḥ

3.4.4.3 doṣābhāvaḥ
3.4.4.4 vedaprāmāṇyam
4 siddhāntaḥ
4.1 vedaprāmāṇyaniścayaḥ
4.2 svataḥprāmāṇyadūṣaṇam
4.2.1 svato grahaṇam
4.2.1.1 na pratyakṣeṇa prāmāṇyagrahaṇam
4.2.1.1.1 jñānavyāpāraprāmāṇyagrahaṇam
4.2.1.1.2 phalaprāmāṇyagrahaṇam
4.2.1.1.2.1 indriyajñānam
4.2.1.1.2.2 mānasapratyakṣam
4.2.1.2 nānumānena prāmāṇyagrahaṇam
4.2.1.2.1 phalaprāmāṇyaniścayaḥ
4.2.1.2.2 jñānaprāmāṇyaniścayaḥ
4.2.1.2.2.1 nirviśeṣaṇam
4.2.1.2.2.2 yathārthatvaviśiṣṭam
4.2.1.3 svānubhavena
4.2.1.3.1 utpattikāle gṛhyate (→3.3.3.2, 3.4.3.3.1)
4.2.1.3.2 saṃśayāt pravṛttiḥ
4.2.1.3.2.1 vipralambhaḥ
4.2.1.3.2.2 vastuvṛttena saṃśayaḥ
4.2.1.3.2.3 ananubhavaḥ (→3.4.2)
4.2.1.3.2.4 viśeṣāgrahaṇam
4.2.1.3.2.4.1 spaṣṭatā
4.2.1.3.2.4.2 niṣkampatā
4.2.1.3.2.4.3 nirvicikitsatā
4.2.1.3.2.4.4 bādhādarśanam
4.2.1.3.2.4.5 svaviṣayāvyabhicāritvam
4.2.1.3.2.5 saṃśayasamarthanopasaṃhāraḥ (→3.4.3.3.1)
4.2.1.3.3 prāmāṇyāgrahaṇam
4.2.1.4 upasaṃhāraḥ

4.2.2 svataḥ prāmāṇyaṃ bhavati
4.2.2.1 kāryatvāt
4.2.2.2 samyakkāryam
4.2.2.3 āyurvedāgamāt (→3.3.1.2.1, 3.3.1.2.2.4)
4.2.2.4 upasaṃhāraḥ
4.2.3 svakāryakaraṇe (→3.3.2)
4.2.3.1 sāmagrī
4.2.3.2 tadekadeśaḥ
4.2.3.3 tajjanyaṃ jñānam
4.2.4 na svataḥ prāmāṇyaniścaye
4.3 parataḥprāmāṇyasiddhiḥ
4.3.1 paroktadoṣoddhāraḥ (→3.3.3.3.3.2, 3.3.3.3.4)
4.3.1.1 netaretarāśrayaṃ cakrakaṃ vā (→3.3.3.1.2, 3.3.3.3.4)
4.3.1.2 na vaiyarthyam (→3.3.3.1.2, 3.3.3.3.3.2)
4.3.2 pravṛttisāmarthyam
4.3.2.1 bhāṣyakāranirṇayaḥ
4.3.2.2 arthakriyājñānasya viśeṣaḥ (→3.3.3.3.3.1, 3.3.3.3.3.1.3)
4.3.2.2.1 aparīkṣaṇīyaprāmāṇyatvam
4.3.2.2.2 saṃśayābhāvaḥ
4.3.2.2.3 paryālocanaprabandhaḥ (→3.3.3.3.3.1.1)
4.3.2.2.4 kāraṇaparīkṣā
4.3.2.2.5 avyabhicāritvadarśanam
4.3.2.2.6 viśeṣapratibhāsaḥ (→3.3.3.3.3.2)
4.3.2.3 upasaṃhāraḥ
4.4 abhyaste viṣaye svataḥprāmāṇyam iti pakṣe dūṣaṇam (→3.3.3.3.3.3)
4.5 pramāṇaparīkṣaṇam
5 upasaṃhāraḥ

# न्यायमञ्जरी।
# प्रामाण्यविचारः

## [1 विषयः]

प्रमाणत्वं तु शब्दस्य कथमित्यत्र वस्तुनि।
जैमिनीयैरयं तावत् पीठबन्धो ऽभिधीयते॥
प्रामाण्यमप्रामाण्यं वा सर्वविज्ञानगोचरम्।
स्वतो वा परतो वेति प्रथमं प्रविविच्यताम्॥

## [2 प्रकरणसंबन्धः]

ननु शब्दप्रामाण्यचिन्तावसरे सकलप्रमाणप्रामाण्यविचारस्य कः प्रसङ्गः। न स्वातन्त्र्येण तत्परीक्षणम्, अपि तु तदर्थमेव, समानमार्गत्वात्। यथान्येषां स्वतः परतो वा प्रामाण्यं तथा शब्दस्यापि भविष्यतीति। न हि तस्य स्वरूपमिव प्रामाण्यमपि तद्विसदृशमिति।

---

**3** *Nyāyamañjarīgranthibhaṅga* 75.15: पीठबन्धः भूमिकारचनम्।
**4** *Ślokavārttika codanā* 33: सर्वविज्ञानविषयमिदं तावत्परीक्ष्यताम्। प्रमाणत्वाप्रमाणत्वे स्वतः किं परतो ऽथवा॥
**7 ननु शब्दप्रामाण्यचिन्तावसरे ··· तद्विसदृशमिति** ] Cf. *Tātparyaṭīkā* ad *codanā* 33: ननु चोदनाप्रामाण्यसदसद्भावविचाराधिकारे तत्प्रामाण्याक्षेपपरिहारप्रतिसमाधाने वक्तव्ये सर्वविज्ञानप्रामाण्यपरीक्षणमसंबद्धम्, अप्रस्तुताभिधानात्। नैष दोषः। चोदनाप्रामाण्यसिद्ध्यर्थमेव निश्चितप्रामाण्याप्रामाण्येषु ज्ञानेषु कथमप्रामाण्यं प्रामाण्यं वेति परीक्ष्यते, यथा तेषु तथा चोदनायाम्। न हि चोदनाया विषयवदलौकिकं प्रामाण्यमप्रामाण्यं वा, निष्प्रमाणकत्वात्। तस्माद्युक्तो विचारः।

---

**3 ऽभिधीयते** ] $K_1$; **विधीयते** $MVL_1$ **4 ॰गोचरम्** ] $M^{ka}K_1L_1$; **॰गोचरः** MV **5 प्रविविच्यताम्** ] $MVK_1$; **प्रविवेचताम्** $L_1$ **7 ॰प्रमाण॰** ] $MVL_1$; **॰प्रमाणम॰** $K_1$ **8 तत्परीक्षणम्** ] $M^{en}K_1$; **परीक्षणम्** $MVL_1$ **9 यथा॰** ] $MK_1L_1$; **अथा॰** $M^{kha}V$ **10 तद्वि॰** ] $MVL_1$; **तद्विसृ॰** $K_1$

### [3 कौमारिलमतोपन्यासः]

तदुच्यते। किं विज्ञानानां प्रामाण्यमप्रामाण्यं चेति द्वयमपि स्वतः, उतोभयमपि परतः, आहोस्विद् अप्रामाण्यं स्वतः प्रामाण्यं तु परतः, उतस्वित् प्रामाण्यं स्वतो ऽप्रामाण्यं तु परत इति।

### [3.1 द्वयमपि स्वतः]

तत्र द्वयमपि स्वत इति तावदसांप्रतम्, प्रवृत्तस्य विसंवाददर्शनात्। यदि हि प्रामाण्यमितरद्वा स्वत एव ज्ञानस्य गम्येत, तर्हि शुक्तौ रजतज्ञानं प्रमाणतया प्रतिपन्नमन्यथा वा।

प्रमाणत्वपरिच्छिन्नं विसंवदति तत्कथम्।
अप्रामाण्यगृहीते वा तस्मिन् कस्मात्प्रवर्तते॥

### [3.2 अप्रामाण्यं स्वतः प्रामाण्यं परतः]

एतेन तृतीयो ऽपि पक्षः प्रत्युक्तो यद् अप्रामाण्यं स्वतः प्रामाण्यं तु परत इति।

### [3.2.1 नाप्रामाण्यं स्वतः]

#### [3.2.1.1 प्रवृत्तिर्न प्राप्नोति]

स्वतो ह्यप्रामाण्ये निश्चिते प्रवृत्तिर्न प्राप्नोतीति।

#### [3.2.1.2 अप्रामाण्यं परापेक्षम्]

किं चाप्रामाण्यमुत्पत्तौ कारणदोषापेक्षम्, निश्चये च बाधकज्ञानापेक्षम्। तत्कथं स्वतो भवितुमर्हति।

---

**3 उतोभय°** ] $M^{kha}VK_1$; **उत तदुभय°** $ML_1$ **6 °सांप्रतम्** ] $MVK_1L_1$; **°शाश्वतम्** $M^{ka}$ **7 गम्येत** ] $MK_1L_1$; **गम्यते** V **8 प्रमाणतया** ] $K_1$; **प्रमाणतया वा** $MVL_1$ **9 °परिच्छिन्नं** ] $M^{ka}K_1L_1$; **°परिच्छित्तौ** MV **10 अप्रामाण्यगृहीते** ] $M^{ka}K_1L_1$; **अप्रामाण्यगृहीतौ** MV **12 प्रामाण्यं तु** ] $MK_1$; **प्रामाण्यं** $M^{kha}VL_1$ **18 चाप्रामाण्य°** ] $MVL_1$; **चाप्रमाण्य°** $K_1$ **18 कारणदोषापेक्षम्** ] $M^{en}VL_1$; **करणदोषापेक्षम्** M; **कारणदोषसापेक्षम्** $K_1$ **18 निश्चये च** ] $VK_1L_1$; **निश्चये** M

## [3.2.1.3 अप्रामाण्यं वस्त्वेव]

यच्च

अप्रामाण्यमवस्तुत्वान्न स्यात् कारणदोषतः।

इति कैश्चिदुच्यते, तदपि यत्किंचित्। संशयविपर्ययात्मनो ऽप्रमाणस्य वस्तुत्वात् तद्गतमप्रामाण्यमपि वस्त्वेवेति।

## [3.2.2 न प्रामाण्यं परतः]

परतस्तु प्रामाण्यं यथा नावकल्पते, तथा विस्तरेणोच्यते।

## [3.3 द्वयमपि परतः]

स चायं द्वयमपि परत इति द्वितीयपक्षप्रतिक्षेपो ऽपि भविष्यति। अर्थतथात्वप्रकाशकं हि प्रमाणमित्युक्तम्। तस्य स्वप्रमेयाव्यभिचारित्वं

---

**3** *Ślokavārttika codanā* 39ab; *Nyāyamañjarīgranthibhaṅga* 75.16–18: **अप्रामाण्यमवस्तुत्वादिति। अप्रामाण्यं धर्मि, कारणदोषतो न स्यादिति साध्यम्, अवस्तुत्वादिति हेतुः। 'वस्तुत्वात्तु गुणैस्तेषां प्रामाण्यमुपजन्यते' इत्युत्तरमर्धम्।** **10** °त्युक्तम्] *Tātparyaṭīkā* ad *codanā* 60cd: **यत्पुनः "इदमित्थम्" इति वस्तुतथात्वनिश्चायकमुत्पद्यते, न च बाधकप्रत्ययः कारणदोषज्ञानं वा, तत्रेयमाशङ्का "क्वचिद्व्यभिचारदर्शनादन्यथाभावः स्यात्" इति न युक्ता विवेकिना कर्तुम्।**; 167cd: **येन प्रमाणेन विषयीकृत्यार्थं प्रत्येति यदि तददुष्टकारणारब्धं भवति तदा तथात्वमर्थस्य प्रतिपद्यत इति।**; The exact formula is not found in the *Nyāyamañjarī*. Cf. *Āgamaḍambara* 184.13–15: **न प्रमाणान्तरानुग्रहरहितः शब्दः प्रमाणतामश्नुते। अभिधायक एव ह्यसौ, नार्थतथात्वसमर्पकः।**; *Nyāyamañjarī* I 10.11–11.2, Kataoka 2007:173(154).3–5: **अर्थतथात्वेतरत्वपरिनिश्चये तु पुरुषमुखप्रेक्षित्वमस्यापरिहार्यम्। तस्मादाप्तोक्तत्वादेव शब्दः प्रमाणीभवति नान्यथेति। एतच्चास्मिन्नेव शास्त्रे व्युत्पादयिष्यते।**

---

**3 यच्च अप्रामाण्य°**] MVL$_1$; **यच्च अप्रमाण°** M$^{ga}$; **यथाप्रामाण्य°** K$_1$ **3 °न्न स्यात्**] MVK$_1$L$_1$; **°त्तस्मात्** M$^{ka}$ **3 कारण°**] MK$_1$L$_1$; **करण°** M$^{kha}$V **5 ऽप्रमाणस्य**] MK$_1$L$_1$; **अप्रामाण्यस्य** M$^{kha}$V **9 स चायं**] M$^{ka}$K$_1$L$_1$; **एवञ्चायं** MV **9 भविष्यति**] MVL$_1$; **भविष्यतीति** K$_1$

नाम प्रामाण्यम्। तच्च परापेक्षायां सत्यां परत इति कथयितुमुचितम्। न चास्य परापेक्षा क्वचिद्विद्यते। सा हि भवन्ती उत्पत्तौ वा स्यात्, स्वकार्यकरणे वा, प्रामाण्यनिश्चये वा।

[3.3.1 उत्पत्तौ]

उत्पत्तौ कारकस्वरूपमात्रापेक्षा तदतिरिक्ततद्गतगुणापेक्षा वा।

[3.3.1.1 कारकस्वरूपमात्रापेक्षायाम्]

कारकस्वरूपमात्रापेक्षायां सिद्धसाध्यत्वम्। असत्सु कारकेषु कार्यस्य ज्ञानस्यात्मलाभाभावात् कस्य प्रामाण्यमप्रामाण्यं वा चिन्त्येत।

[3.3.1.2 कारकातिरिक्ततदधिकरणगुणापेक्षायाम्]

[3.3.1.2.1 गुणप्रमाणाभावः]

कारकातिरिक्ततदधिकरणगुणापेक्षणं तु दुर्घटम्, अप्रमाणिकत्वेन कारकगुणानामाकाशकुशेशयसदृशवपुषामपेक्षणीयत्वाभावात्।

न कारणगुणग्राहि प्रत्यक्षमुपपद्यते।
चक्षुरादेः परोक्षत्वात् प्रत्यक्षास्तद्गुणाः कथम्॥
लिङ्गं चादृष्टसंबन्धं न तेषामनुमापकम्।

---

**3** Cf. *Tātparyaṭīkā* ad *codanā* 48: तदनेन श्लोकद्वयेन स्वोत्पत्तौ स्वकार्ये च सामग्र्यन्तरं स्वग्रहणापेक्षता च निरस्ता। अपेक्षाद्वयरहितं च प्रमाणं स्वत इत्युच्यते। तदिदमुक्तम्—“तत्प्रमाणं बादरायणस्यानपेक्षत्वात्” इति।
**11 अप्रमाणिकत्वेन** ] See section 4.2.2.3.

---

**1 तच्च** ] $K_1$; **अतश्च** $MVL_1$ **1 सत्यां** ] $VK_1L_1$; **सत्यां हि** M **5 कारक°** ] $MVL_1$; **कारण°** $K_1$ **5 वा** ] $MVK_1$; om. $M^{ka}L_1$ **7 कारक°** ] $MVL_1$; **कारण°** $K_1$ **7 °त्वम्। असत्सु** ] $MVL_1$; **°त्वसमत्सु** $K_1$ **8 ज्ञानस्यात्मलाभाभावात्** ] $MVK_1L_1$; **ज्ञानस्य स्वरूपलाभाद्भेदात्** $M^{en}$ **8 चिन्त्येत** ] $K_1$; **चिन्त्यते** $MVL_1$ **11 °क्षणं** ] $MVK_1$; **°क्षणे** $L_1$ **11 अप्रमाणिकत्वेन** ] $K_1$; **अप्रामाणिकत्वेन** $MVL_1$ **12 कारक°** ] $K_1$; **कारण°** $MVL_1$ **15 लिङ्गं चा°** ] $MVL_1$; **लिंगञ्च** $K_1$ **15 °मनुमापकम्** ] $MVK_1$; **°मुपमापकम्** $L_1$

[3.3.1.2.2 **दोषाभावः**]

**यथार्थबुद्धिसिद्धिस्तु निर्दोषादेव कारकात्॥**

[3.3.1.2.2.1 **उपलब्धित्रैविध्याभावः**]

**यदि हि यथार्थायथार्थतारूपद्वयरहितमेव किंचिदुपलब्ध्याख्यं कार्यं भवेत्, कार्यत्रैविध्यात् कारणत्रैविध्यमध्यवसीयेत। यथार्थोपलब्धेर्गुणवत्कारकं कारकम्, अयथार्थोपलब्धेर्दोषकलुषं कारकं कारकम्, उभयरूपरहितायास्तु तस्याः स्वरूपावस्थितमेव कारकं कारकमिति। न त्वेवं समस्ति। द्विविधैव खल्वियमुपलब्धिर्यथार्थत्वायथार्थत्वभेदेन।**

[3.3.1.2.2.2 **अप्रामाण्यं दोषात्**]

**तत्रायथार्थोपलब्धिस्तावद् दुष्टकारककार्यैव दृष्टा।**

**दृष्टः कुटिलकुम्भादिसंभवो दुष्टकारणात्।**
**तथा मानान्तरज्ञातात् तिमिरादेर्द्विचन्द्रधीः॥**

[3.3.1.2.2.3 **प्रामाण्यं स्वरूपात्**]

**अयथार्थोपलब्धौ दुष्टकारककार्यत्वेन सिद्धायाम् इदानीं तृतीयकार्याभावाद् यथार्थोपलब्धिः स्वरूपावस्थितेभ्य एव कारकेभ्यो ऽवकल्पत**

---

**4** *Ślokavārttika codanā* 35bcd–36: **परतो न च। निःस्वभावत्वमेवं हि ज्ञानरूपे प्रसज्यते॥ कथं ह्यन्यानपेक्षस्य विपरीतात्मसंभवः। किमात्मकं भवेत्तच्च स्वभावद्वयवर्जितम्॥**

---

**4 यथार्था॰** ] $K_1L_1$ ; **यथार्थत्वा॰** MV **4 ॰यथार्थता॰** ] $K_1$ ; **॰यथार्थत्व॰** $MVL_1$ **4 ॰रहितमेव** ] $K_1$ ; **॰रहितं** $MVL_1$ **5 कार्य॰** ] $K_1$ ; **ततः कार्य॰** $MVL_1$ **5 ॰मध्यवसीयेत** ] $K_1$ ; **॰मवश्यमवसीयेत** MV ; **॰मवश्यमवसीयते** $L_1$ **7 ॰रूप॰** ] $VK_1L_1$ ; om. M **8 त्वेवं समस्ति** ] $K_1^{pc}$ ; **त्वेवमस्ति** $MVL_1$ ; **त्वेव समस्ति** $K_1^{ac}$ **8 ॰र्थत्वा॰** ] $M^{en}VK_1$ ; **॰र्थत्ब॰** M ; **॰र्थता॰** $L_1$ **13 ॰ज्ञाता॰** ] $MK_1L_1$ ; **॰मिता॰** $M^{kha}V$ **15 ॰पलब्धौ** ] $K_1$ ; **॰पलब्धौ च** $MVL_1$ **15 ॰कार्यत्वेन** ] $MVL_1$ ; **॰कर्यत्वेन** $K_1$ **16 ॰भावाद्** ] $MVK_1$ ; **॰भावा** $L_1$ **16 कारकेभ्यो** ] $MVK_1$ ; **कारकेकेभ्यो** $L_1$

इति न गुणकल्पनायै प्रभवति।

अनुमाने च यैव पक्षधर्मान्वयादिसामग्री ज्ञानस्य जनिका, सैव प्रामाण्यकारकत्वेन दृष्टा। न च स्वरूपस्थितानि कारणानि कार्यजन्मन्युदासत एव, येन यथार्थोपलब्धिजनन एषां गुणसहकारिता कल्प्येत—इत्यतो न सन्ति कारणगुणाः।

[3.3.1.2.2.4 दोषनिर्हरणाय]

नैर्मल्यव्यपदेशस्तु लोचनादेः काचकामलादिदोषापायनिबन्धन एव, न स्वरूपातिरिक्तगुणकृतः। अञ्जनाद्युपयोगो ऽपि दोषनिर्हरणायैव, न गुणजन्मने।

[3.3.1.3 उपसंहारः]

तस्मादवितथा संवित् स्वरूपस्थितहेतुजा।
दोषाधिकैस्तु तैरेव जन्यते विपरीतधीः॥
अत एवाप्रमाणत्वं परतो ऽभ्युपगम्यते।
जन्मन्यपेक्षते दोषान् बाधकं च स्वनिश्चये॥

तस्मान्नोत्पत्तौ गुणापेक्षं प्रमाणम्।

---

**1** Cf. *Tātparyaṭīkā* ad *codanā* 47 (54.10): प्रत्यक्षे ऽपि तत्संभवात्तदेवोत्पादकम्, अर्थान्तरपरिकल्पनायां प्रमाणाभावात्।

**2** Cf. *Tātparyaṭīkā* ad *codanā* 47 (54.8–9): अन्वयव्यतिरेकाभ्यां तु विज्ञानोत्पादकमेव त्रैरूप्यानुमानादौ प्रामाण्योत्पादकं दृष्टम्।

**7 नैर्मल्यव्यपदेश॰** ] See section 4.2.2.3.

**8 अञ्जनाद्युपयोगो** ] Cf. *Tātparyaṭīkā* ad *codanā* 47 (54.3): अञ्जनादीनां च दोषापगमे व्यापारः, न गुणाधाने।

---

**3 ॰कारकत्वेन** ] $K_1L_1$; ॰कारणत्वेन MV **4 ॰जनन** ] $M^{en}VK_1L_1$; ॰जनेन M **4 एषां** ] $K_1L_1$; तेषां $MM^{en}V$; येषां $M^{ka}$ **4 ॰सहकारिता** ] $M^{en}VK_1L_1$; ॰कारिता M **5 कल्प्येत—इ॰** ] $ML_1$; कल्प्यत इ॰ $M^{kha}VK_1$ **7 ॰कामलादि॰** ] $MVL_1$; ॰कामिलादि॰ $K_1$ **11 ॰स्थित॰** ] $MVK_1L_1$; ॰स्थिति॰ $M^{en}$

[3.3.2 स्वकार्यकरणे]

नापि स्वकार्यकरणे किंचिदपेक्षते, अर्थप्रकाशनस्वभावस्यैव तस्य स्वहेतोरुत्पादात्। अर्थप्रकाशनमेव च प्रमाणकार्यम्, प्रवृत्त्यादेः पुरुषेच्छानिबन्धनत्वात्।

नैव वा जायते ज्ञानं, जायते वा प्रकाशकम्।
अर्थप्रकाशने किंचिन्न तूत्पन्नमपेक्षते॥

तथा चोक्तम्—

मृद्दण्डचक्रसूत्रादि घटो जन्मन्यपेक्षते।
उदकाहरणे त्वस्य तदपेक्षा न विद्यते॥ इति।

अथवा

सापेक्षत्वं घटस्यापि सलिलाहरणं प्रति।
यत्किंचिदस्ति, न त्वेवं प्रमाणस्योपपद्यते॥
न च स्वग्रहणापेक्षं ज्ञानमर्थप्रकाशकम्।
तस्मिन्ननवबुद्धे ऽपि तत्सिद्धेश्चक्षुरादिवत्॥

उक्तं च "न ह्यज्ञाते ऽर्थे कश्चिद् बुद्धिमुपलभते, ज्ञाते त्वनुमाना-

---

**2** See section 4.2.3.
**4** Cf. *Nyāyamañjarī* II 92.8–11: प्रवृत्तिरपि पुरुषेच्छानिबन्धना। स्वर्गस्य साध्यत्वे यागस्य साधनत्वे ऽवधारिते यः स्वर्गमिच्छेत् स तत्सिद्धये प्रवर्तेतैव। यस्तु नेच्छेत् तस्य विधिरपि किं कुर्यात्। न ह्यप्रवर्तमानस्य पुंसो विधिर्गले पाशं निदधाति, रज्ज्वा वा बाहू बध्नाति।; *Vidhiviveka* ad 1.6 (Stern 211.3–212.1): फलार्थिता चेत् प्रवृत्तिहेतुः, सेच्छा तद्योगो वा पुरुषधर्म इति न फलव्यापृतिः।; *Vidhiviveka* ad 2.10: पुरुषेच्छानिबन्धनप्रवृत्तिः पुरुषार्थः।; see also section 4.2.3.3.
**8** *Bṛhaṭṭīkā* (quoted in *Tattvasaṁgraha* 2850); cf. *Ślokavārttika codanā* 48: आत्मलाभे हि भावानां कारणापेक्षिता भवेत्। लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव तु॥
**15** *Śābarabhāṣya* ad 1.1.3–5 (*vṛttikāra*), F 30.1–2.

---

**2 अर्थप्रकाशन॰ ··· ॰रुत्पादात्** ] MVK$_1$; om. L$_1$(eyeskip) **5 प्रकाशकम्** ] MVL$_1$; **प्रकाशकः** K$_1$ **12 त्वेवं** ] MVL$_1$; **त्वेव** K$_1$

दवगच्छति” इति। तस्मात्स्वकार्यकरणे ऽपि न स्वग्रहणादिसापेक्षं प्रमाणम्।

[3.3.3 प्रामाण्यनिश्चये]

नापि प्रामाण्यनिश्चये किंचिदपेक्षते, अपेक्षणीयाभावात्। तथा ह्यस्य कारणगुणज्ञानाद्वा प्रामाण्यनिश्चयो भवेत्, बाधकाभावज्ञानात्, संवादाद्वा।

[3.3.3.1 न कारणगुणज्ञानात्प्रामाण्यनिश्चयः]

[3.3.3.1.1 निरस्तत्वात्]

न तावत्कारणगुणज्ञानात्, गुणानामिदानीमेव निरस्तत्वात्।

[3.3.3.1.2 चक्रकपातः]

अपि च न कारणगुणज्ञानमिन्द्रियकारणकम्, अतीन्द्रियकारकाधिकरणत्वेन परोक्षत्वाद्गुणानाम्। अपि तूपलब्ध्याख्यकार्यपरिशुद्धिसमधिगम्यं गुणस्वरूपम्। अप्रवृत्तस्य च प्रमातुर्न कार्यपरिशुद्धिबुद्धिर्भवति। तत्रेदानीं प्रामाण्यनिश्चयपूर्विका वा प्रवृत्तिर्भवेत्। अन्यथा वानिश्चितप्रामाण्यादेव ज्ञानात्प्रवृत्तिसिद्धौ किं पश्चात्तन्निश्चयेन प्रयो-

---

**1 स्वग्रहणा°** ] Cf. *Tātparyaṭīkā* ad *codanā* 48: नैव हि प्रमाणं स्वकार्ये स्वग्रहणमपेक्षते, अगृहीतप्रामाण्यादपि विज्ञानाद्विषयपरिच्छेदसिद्धेः।; *codanā* 83abc: न तावदुत्पत्तौ स्वग्रहणमपेक्षते, नापि विषयपरिच्छित्तिलक्षणे स्वकार्ये, अगृहीतप्रामाण्यादपि विज्ञानाद्विषयपरिच्छेदसिद्धेः।

**9 निरस्तत्वात्** ] Section 3.3.1.2.1

---

**1 °ग्रहणादिसा°** ] K$_1$; **°ग्रहणा°** MVL$_1$ **5 °भावज्ञानात्** ] K$_1$L$_1$; **°भावज्ञानाद्वा** MV **9 गुणाना°** ] K$_1$; **कारणगुणाना°** MV; **कारणगुणाद्गुणाना°** L$_1$ **11 कारण°** ] MVK$_1$L$_1$; **कारक°** M$^{kha}$ **11 °कारणकम्** ] M$^{kha}$VK$_1$L$_1$; **°करणकम्** M **12 तूपलब्ध्या°** ] MVK$_1$; **तूपलब्धा°** L$_1$ **13 °गम्यं** ] MK$_1$; **°गम्य** VL$_1$ **13 °स्वरूपम्** ] MVK$_1$; **°स्वरूप** L$_1$ **14 °बुद्धिर्भवति** ] K$_1$; **°र्भवति** MVL$_1$ **14 तत्रे°** ] M$^{ka}$K$_1$L$_1$; **तन्ने°** MV **14 वा** ] K$_1$; om. MVL$_1$ **14 अन्यथा** ] MVL$_1$; **अन्यथो** K$_1$

जनम्। निश्चितप्रामाण्यात्तु प्रवृत्तौ दुरतिक्रमः चक्रकक्रकचपातः। प्रवृत्तौ सत्यां कार्यशुद्धिग्रहणम्, कार्यशुद्धिग्रहणात्कारणगुणावगतिः, कारणगुणावगतेः प्रामाण्यनिश्चयः, प्रामाण्यनिश्चयात्प्रवृत्तिरिति।

### [3.3.3.2 बाधकाभावज्ञानात्]

नापि बाधकाभावपरिच्छेदात्प्रामाण्यनिश्चयः। स हि तात्कालिको वा स्यात् कालान्तरभावी वा। तात्कालिको न पर्याप्तः प्रामाण्यपरिनिश्चये, कूटकाञ्चनादौ किंचित्कालमनुत्पन्नबाधके ऽपि कालान्तरे तदुत्पाददर्शनात्। सर्वदा तदभावस्तु नासर्वज्ञस्य गोचरः।

### [3.3.3.3 संवादात्]

अथ संवादात्प्रामाण्यनिश्चय उच्यते, उच्यतां को ऽयं संवादो नाम। किम् उत्तरं तद्विषयं ज्ञानमात्रम्, उतार्थान्तरज्ञानम्, आहोस्विद् अर्थक्रियाज्ञानमिति।

### [3.3.3.3.1 ज्ञानमात्रम्]

आद्ये पक्षे कः पूर्वोत्तरज्ञानयोर्विशेषः, यदुत्तरज्ञानसंवादात्पूर्वं ज्ञानं प्रामाण्यमश्नुवीत। अपि च—

उत्तरोत्तरसंवादात्पूर्वपूर्वप्रमाणताम्।

---

**1 प्रयोजनम्** ] See section 4.3.1.2.
**1 चक्रक॰** ] See section 4.3.1.1.
**1** *Nyāyamañjarīgranthibhaṅga* 75.19: [**चक्रकेति**] **त्रियन्त्र्यादीनां परस्परसापेक्षाणां चक्रवद् भ्रमतां चक्रकव्य[प]देशः।**

---

**2 ॰शुद्धि॰** ] $K_1$; **॰परिशुद्धि॰** $MVL_1$ **2 ॰शुद्धि॰** ] $K_1$; **॰परिशुद्धि॰** $MVL_1$ **6 तात्कालिको** ] $MVK_1$; **तात्कालिके** $L_1$ **7 ॰काञ्चनादौ** ] $K_1L_1$; **॰कार्षापणादौ** MV **8 सर्वदा** ] $MK_1$; **सर्वथा** $VL_1$ **10 उच्यतां** ] $K_1$; **तर्ह्युच्यतां** $MVL_1$ **11 उतार्थान्तरज्ञानम्** ] $MVK_1L_1$; **उतार्थान्तरज्ञानमात्रम्** $M^{en}$ **11 आहोस्विद्** ] $MVL_1$; **आहो** $K_1$ **14 ॰त्पूर्वं** ] $M^{ka}K_1$; **॰त्पूर्वं पूर्वं** $MVL_1$ **15 ॰श्नुवीत** ] $MVL_1$; **॰श्नुवीतः** $K_1$ **16 अपि च—उत्तरोत्तर॰** ] $K_1$; **अपि चोत्तर॰** $MVL_1$ **16 ॰त्पूर्वपूर्व॰** ] $MVK_1$; **॰त्पूर्वं पूर्व॰** $L_1$

वदन्तो नाधिगच्छेयुरन्तं युगशतैरपि॥
सुदूरमपि गत्वा तु प्रामाण्यं यदि कस्यचित्।
स्वत एवाभिधीयेत, को द्वेषः प्रथमं प्रति॥

यदाह—

कस्यचित्तु यदीष्येत स्वत एव प्रमाणता।
प्रथमस्य तथाभावे प्रद्वेषः किंनिबन्धनः॥ इति।

[3.3.3.3.2 **अर्थान्तरज्ञानम्**]

अथान्यविषयं ज्ञानमन्यस्य संवाद उच्यते, तदयुक्तम्, अदर्शनात्। न हि स्तम्भज्ञानं कुम्भज्ञानस्य संवादः।

[3.3.3.3.3 **अर्थक्रियाज्ञानम्**]

अथार्थक्रियाज्ञानसंवादात्प्रथमस्य प्रवर्तकज्ञानस्य प्रामाण्यमिष्यते, तदपि ह्यनवसितप्रामाण्यं कथमाद्यस्य प्रामाण्यमवगमयेत्।

[3.3.3.3.3.1 **विशेषाभावादनवस्थाप्रसङ्गः**]

कश्चार्थक्रियाज्ञानस्य पूर्वस्माद्विशेषः, यदेतदधीनस्तस्य प्रामाण्याधिगमः।

[3.3.3.3.3.1.1 **अर्थक्रियाज्ञानस्यापि स्वप्ने व्यभिचारः**]

---

**5 कस्यचित्तु ⋯ किंनिबन्धनः** ] *Ślokavārttika codanā* 76.
**11** Cf. *Tātparyaṭīkā* ad *codanā* 76: ननु नैव घटज्ञानस्य (घटज्ञानस्य ] ms.; om. ed.) घटज्ञानान्तरसंवादात्प्रामाण्यम्। अपि तूदकाहरणरूपार्थक्रियासंवादात् (◦रूपार्थक्रियासंवादात् ] ms.; ◦रूपक्रियासंवादात् ed.)।
**14** See section 4.3.2.2.

---

**6 प्रद्वेषः** ] $K_1$; **विद्वेषः** $MVL_1$ **8 ◦विषयं** ] $K_1$; **◦विषय◦** $MVL_1$ **8 ◦मन्यस्य** ] $MK_1L_1$; **◦मप्यस्य** $M^{kha}V$ **9 स्तम्भज्ञानं** ] $MVL_1$; **स्तम्भज्ञान◦** $K_1$ **9 संवादः** ] $MVL_1$; **संवादा** $K_1$ **11 अथार्थ◦** ] $MVK_1^{pc}L_1$; **अथार्थज्ञान◦** $K_1^{ac}$ **11 प्रवर्तकज्ञानस्य** ] $K_1L_1$; **प्रवर्तकस्य ज्ञानस्य** $MV$ **12 कथमाद्यस्य** ] $M^{ka}K_1L_1$; **कथमादिमस्य** $MV$ **14 ◦दधीन◦** ] $M^{ka}K_1L_1$; **◦दायत्त◦** $MV$

अर्थक्रियाज्ञानत्वमेव विशेष इति चेत्। किल सलिलज्ञानमाद्यमविद्यमाने ऽपि पयसि पूषदीधितिषु दृष्टमिति न भवति विस्रंभभूमिः। इदं पुनरर्थक्रियासंवेदनमम्बुमध्यवर्तिनः पानावगाहनादिविषयमुदेतीत्यनवधारितव्यभिचारितया तत्प्रामाण्यनिश्चयाय कल्पत इति। तदप्यसत्, स्वप्ने पानावगाहनादिज्ञानस्यापि व्यभिचारोपलब्धेः।

[3.3.3.3.3.1.2 चरमधातुविसर्गः]

किं च चरमधातुविसर्गो ऽपि स्वप्ने सीमन्तिनीमन्तरेणापि भवतीति महानेष व्यभिचारः।

अथ रागोद्रेकनिमित्तत्वेन पित्तादिधातुविकृतिनिबन्धनत्वेन वा तद्विसर्गस्य न स्वसाधनव्यभिचार इत्युच्यते। तदपि न समञ्जसम्, असकृदनुभूतयुवतिपरिरम्भाद्यन्वयव्यतिरेकानुविधायित्वेन

---

**1** Cf. *Tātparyaṭīkā* ad *codanā* 76: न च तत्र संवादापेक्षा। अर्थक्रियार्थी पूर्वस्मात्प्रवर्तमानो व्यभिचारदर्शनेन संवादमपेक्षते। अर्थक्रियाज्ञानस्य तु पुरुषार्थत्वादुत्पन्ने तस्मिन्न काचिदपेक्षा।
**4** Cf. section 4.3.2.2.3.
**5** Cf. *Tātparyaṭīkā* ad *codanā* 76: अर्थक्रियाज्ञानस्यापि स्वप्नावस्थायां व्यभिचारदर्शनान्न कश्चिद् घटविज्ञानाद्विशेषः।
**7** Cf. Vasubandhu's *Viṃśikāvṛtti* ad 4ab: यथा स्वप्ने द्वयसमापत्तिमन्तरेण शुक्रविसर्गलक्षणः स्वप्नोपघातः।

---

**1 किल सलिल°** ] $MVK_1$ ; **सलिल°** $L_1$ **2 पूष°** ] $MVK_1L_1$ ; **पीयूष°** $M^{ka}$ **2 °दीधितिषु** ] $VK_1L_1$ ; **°दीधितिषु प्रवर्तकं** M **3 °वगाहना°** ] $MVK_1$ ; **°वगहना°** $L_1$ **4 °मुदेतीत्य°** ] $MK_1$ ; **°मपीत्य°** $M^{kha}V$ ; **°मधीतीत्य°** $L_1$ **4 °चारितया** ] $MK_1L_1$ ; **°चारतया** $M^{kha}V$ **4 तत्प्रामाण्य°** ] $MVK_1L_1$ ; **तत्प्रामाण्यं** $M^{ka}$ **5 तदप्यसत्** ] $K_1$ ; **तदसत्** $MVL_1$ **5 स्वप्ने पानावगाहनादिज्ञानस्यापि** ] $K_1$ ; **स्वप्ने पानावगाहनस्यापि** $MVL_1$ ; **स्वप्ने ऽप्यनवगाहनज्ञानस्यापि** $M^{en}$ **7 स्वप्ने** ] $MK_1$ ; **स्वप्न°** $VL_1$ **7 °न्तरेणापि** ] $K_1$ ; **°न्तरेण** $MVL_1$ **8 व्यभिचारः** ] $MVK_1$ ; **व्यभिचारः इत्युच्यते तदसमञ्जसम्** $L_1$ **9 अथ** ] $MVL_1$ ; **अरा** $K_1$ **10 न** ] $MVK_1$ ; om. $L_1$ **10 तदपि न** ] $K_1$ ; **तद°** $MVL_1$ **11 °रम्भाद्यन्वय°** ] $MVL_1$ ; **°रम्भान्वय°** $K_1$

तत्कारणत्वावधारणात्।

[3.3.3.3.3.1.3 उपसंहारः]

तस्मादर्थक्रियाज्ञानव्यभिचारावधारणात्।
तत्प्रामाण्यपरीक्षायामनवस्था न शाम्यति॥

[3.3.3.3.3.2 वैयर्थ्यम्]

अथवाप्तफलत्वेन किं तत्प्रामाण्यचिन्तया।
प्रथमे ऽपि प्रवृत्तत्वात्किं तत्प्रामाण्यचिन्तया॥

न चेदमर्थक्रियाज्ञानमप्रवृत्तस्य पुंसः समुद्भवति। तत्र प्रामाण्यावधारणपूर्विकायां प्रवृत्तौ कारणगुणज्ञाननिश्चेयप्रामाण्यचर्चावच् चक्रकचोद्यप्रसरस्तदवस्थ एव। अनिश्चितप्रामाण्यस्य तु प्रवृत्तौ पश्चान्निर्णयो भवन्नपि कृतक्षौरस्य नक्षत्रपरीक्षावदफल एवेत्युक्तम्।

[3.3.3.3.3.3 वैयर्थ्यपरिहारः]

तत्रैतत्स्यात्। द्विविधा प्रवृत्तिः—आद्या चाभ्यासिकी च। तत्राद्या

---

**4** See section 4.3.2.2.
**6** See section 4.3.2.2.6.
**7** *Tātparyaṭīkā* ad *codanā* 49–51 (56.18–19): अवगते तु पूर्वं प्रामाण्यग्रहणाद् घटे किमुत्तरकालं प्रामाण्यग्रहणेन।
**9 °चर्चावच्** ] See section 3.3.3.1.2.
**11 नक्षत्रपरीक्षा°** ] See section 4.3.1.
**11 °दफल** ] See section 4.3.1.2.
**11 एवेत्युक्तम्** ] See section 3.3.3.1.2: किं पश्चात्तन्निश्चयेन प्रयोजनम्।
**13** See section 4.4; cf. Śākyabuddhi's *Pramāṇavārttikaṭīkā* quoted in

---

**1 तत्कारणत्वावधारणात्** ] $K_1$; तत्कार्यत्वावधारणात् MV; तत्कार्यत्वानवधारणात् $M^{ka}L_1$ **6 अथवा°** ] $MVL_1$; अथावा° $K_1$ **7 प्रथमे ⋯ °चिन्तया** ] $MK_1$; om. $M^{kha}VL_1$ **8 समुद्भवति** ] $MVK_1L_1^{pc}$; संभवति $L_1^{ac}$ **9 °ज्ञान°** ] $K_1$; om. $MVL_1$ **9 °चर्चावच्** ] $K_1$; °चर्चाबद्ध° $MVL_1$ **10 चक्रक°** ] $K_1$; चक्रकक्रकच° $MVL_1$ **10 °चोद्य°** ] $MVL_1$; °चोद्यं $K_1$ **10 °प्रसर°** ] $K_1$; °प्रसङ्ग° $MVL_1$ **11 पश्चान्निर्णयो** ] $K_1$; पश्चात्तन्निर्णयो $MVL_1$ **13 द्विविधा** ] $K_1$; द्विविधा हि $MVL_1$ **13 चाभ्यासिकी** ] $MVK_1$; चाभ्यायिकी $L_1$

यथा विनिहितसलिलावसिक्तमसृणमृदि शरावे शाल्यादिबीजशक्ति-परीक्षणाय कतिपयबीजकणावापरूपा। ततस्तेषामङ्कुरकरणकौशल-मविकलमवलोकयन्तः कीनाशा निःशङ्कं केदारेषु तानि बीजान्या-वपन्तीति सेयमाभ्यासिकी प्रवृत्तिः।

एवमिहापि प्रथममपरीक्षितप्रमाणभावादेव ज्ञानात्कुतश्चित्क-श्चिद्विपश्चिदपि व्यवहारमारभ्य फलज्ञानेन तस्य प्रामाण्यमवगच्छन् पुनस्तथाविधे बोधे जाते सति सुखमेव प्रवृत्त्यादिव्यवहारमशङ्कित-कालुष्यः करिष्यतीति न सर्वात्मना वैयर्थ्यमिति।

[3.3.3.3.3.4 तथाविधत्वनिश्चयप्रकारः]

उच्यते। विषमो ऽयं दृष्टान्तः।

तज्जातीयतया बीजं व्रीह्यादेर्याति वेदितुम्।
तत्र तन्निश्चयाद्युक्तं निर्विशङ्कं प्रवर्तनम्॥
ज्ञाने तथाविधत्वं तु बोधरूपाविशेषतः।
कार्याद्वा कारणाद्वापि ज्ञातव्यं, न स्वरूपतः॥ इति।
कारणानां परोक्षत्वान् न तद्वारा तदागतिः।

---

Steinkellner 1981:290: द्विधा प्रत्यक्षाश्रया प्रवृत्तिराद्याभ्यासवती च।; see also Inami 1993 for the view of Devendrabuddhi and Śākyabuddhi (cf. Kataoka 2011: II 286, n. 277).
**15** Cf. section 3.3.1.2.1: चक्षुरादेः परोक्षत्वात् प्रत्यक्षास्तद्गुणाः कथम्।

---

**2 °कणावाप°** ] $MK_1L_1$; **°कणवाप°** V **2 ततस्तेषा°** ] $K_1$; ततस्तत्र तेषा° $MVL_1$ **4 सेयमाभ्यासिकी** ] $MVK_1$; सेयामाभ्यायिकी $L_1$ **5 प्रथमम°** ] $K_1$; प्रथम° $MVL_1$ **6 °द्विपश्चिदपि** ] $MVK_1$; °द्विपदपि $L_1$ **6 व्यवहारमारभ्य फलज्ञानेन** ] $K_1$; व्यवहरंस्तद्व्यवहारपरस्तत्तत्फलज्ञाने MV; व्यवहरंस्तद्व्यवहार-परत्वफलज्ञाने $M^{ka}$; व्यवहारपरत्वफलज्ञानेन $L_1$ **7 बोधे** ] $K_1L_1$; om. MV **7 प्रवृत्त्यादि°** ] $K_1$; प्रवृत्त्यादिकं $MVL_1$ **11 व्रीह्यादेर्याति** ] $K_1L_1$; **शक्यते यदि** MV **14 कारणा°** ] $MVL_1$; **करणा°** $K_1$ **15 कारणानां** ] $MVK_1L_1^{pc}$; कारणानां स्वरूपत्व $L_1^{ac}$(unmetrical)

कार्यं तु नाप्रवृत्तस्य भवतीत्युपवर्णितम्॥
तस्माद्वैयर्थ्यचोद्यस्य नायं परिहृतिक्रमः।
एवं चार्थक्रियाज्ञानात् कीदृक्प्रामाण्यनिश्चयः॥

[3.3.3.3.4 कारणज्ञानम्]

समर्थकारणज्ञानाद् यो ऽपि प्रामाण्यनिश्चयम्।
ब्रूते, सो ऽपि कृतोद्वाहस्तत्र लग्नं परीक्षते॥

किलातिविकसितकुसुममकरन्दपानमुदितमधुकरकुले कस्मिंश्चिदुद्याने वाद्यमानायां वीणायां निरन्तरलतासन्तानान्तरितवपुषि दूरानवलोक्यमाने वादके वीणाध्वनिसंविदि रोलम्बनिनादसन्देहदूषितायां तदभिमुखमेव प्रतिष्ठमानः श्रोता परिवादके दर्शनपथमवतीर्णे वीणास्वरानुकूलकारणनिश्चयात् तत्प्रतीतौ संशयनिवृत्तेः प्रामाण्यं निश्चिनोतीत्येष समर्थकारणज्ञानकृतः प्रामाण्यनिश्चयः।

तत्रापि नाप्रवृत्तस्य हेतुसामर्थ्यदर्शनम्।
एवमेव प्रवृत्तौ तु निश्चितेनापि तेन किम्॥
तन्निश्चयात्प्रवृत्तौ वा पुनरन्योन्यसंश्रयः ।
तन्निश्चयात्प्रवृत्तिः स्यात् प्रवृत्तेस्तद्विनिश्चयः॥

---

**1 °त्युपवर्णितम्** ] See section 3.3.3.3.3.2: **न चेदमर्थक्रियाज्ञानमप्रवृत्तस्य पुंसः समुद्भवति।**
**15 पुनर°** ] See section 3.3.3.1.2: **निश्चितप्रामाण्यात्तु प्रवृत्तौ दुरतिक्रमः चक्रकक्रकचपातः।**
**15 °रन्योन्यसंश्रयः** ] See section 4.3.1, 4.3.1.1.

---

**1 कार्यं तु** ] $MK_1L_1$; **कार्या तु** $M^{kha}$; **कार्यात्तु** V   **5 °कारण°** ] $MVL_1$; **°कारणा°** $K_1$   **9 दूरान°** ] $K_1$; **विदूरादन°** $MVL_1$   **9 वादके** ] $MVK_1L_1^{pc}$; **वाके** $L_1^{ac}$   **9 रोलम्बनि°** ] em.; **रोलम्ब°** $MVL_1$; **तोलम्बनि°** $K_1$   **11 वीणा°** ] $K_1$; om. $MVL_1$   **12 °नोतीत्येष** ] $MVL_1^{pc}$; **°नोत्येष** $K_1L_1^{ac}$   **12 °कृतः** ] $MVL_1$; **°कृत°** $K_1$   **13 नाप्रवृत्तस्य** ] $MVK_1$; **नापि वृत्तस्य** $L_1$   **15 °संश्रयः** ] $K_1$; **°संश्रयम्** $MVL_1$   **16 °वृत्तिः स्यात्** ] $MVL_1$; **°वृत्त स्यात्** $K_1$

[3.3.3.4 **प्रामाण्यनिश्चयाभावोपसंहारः**]

तदेवं न कुतश्चिदपि प्रामाण्यनिश्चयः चक्रकेतरेतराश्रयवैयर्थ्यानवस्थादूषनातीतस्थितिरस्तीत्यतः प्रामाण्यनिश्चये ऽपि न किंचिदपेक्षते प्रमाणम्।

[3.3.4 **प्रामाण्यपरतस्त्वाभावोपसंहारः**]

अतश्चोत्पत्तौ स्वकार्यकरणे प्रामाण्यनिश्चये च निरपेक्षत्वादपेक्षात्रयरहितत्वात् स्वतः प्रामाण्यमिति सिद्धम्। तदुक्तम्—

स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम्।
न हि स्वतो ऽसती शक्तिः कर्तुमन्येन पार्यते॥

[3.3.5 **अप्रामाण्यस्वतस्त्वाभावः**]

अप्रामाण्यं तूत्पत्तौ दोषापेक्षत्वात् स्वनिश्चये च बाधकप्रत्ययादिसापेक्षत्वात् परत इत्युक्तमेव।

[3.4 **प्रामाण्यं स्वतो ऽप्रामाण्यं परतः**]

तस्मात्पक्षत्रयस्यानुपपत्तेश्चतुर्थ एवायं पक्षः श्रेयान् प्रामाण्यं स्वतो ऽप्रामाण्यं परत इति।

---

**2 चक्रकेतरेतराश्रयवैयर्थ्यानवस्था॰** ] See sections 3.3.3.1.2, 3.3.3.3.4, 3.3.3.3.2, 3.3.3.3.3.1 respectively.
**8 स्वतः ··· पार्यते** ] *Ślokavārttika codanā* 47.
**12 इत्युक्तमेव** ] See section 3.2.1.2.

---

**2 न** ] MV$K_1L_1$; om. $M^{ka}$ **2 कुतश्चिदपि प्रामाण्यनिश्चयः चक्रकेतरेतरा॰** ] MV; **कुतश्चिदपि प्रामाण्यनियतेतरा॰** $K_1$; **कुतश्चिदपि प्रामाण्यनिश्चयः तदेवं न कुतश्चिदपि प्रामाण्यनिश्चयः चक्रकेतरा॰** $L_1$ **3 ॰श्रयवैयर्थ्यानवस्था॰** ] $K_1$; **॰श्रयानवस्थावैयर्थ्यादि॰** MV$L_1$ **6 अत॰** ] M$K_1L_1$; **तत॰** $M^{kha}$V **6 ॰करणे** ] MV$K_1$; **॰कारणे** $L_1$ **6 प्रामाण्यनिश्चये** ] $K_1L_1$; **स्वप्रामाण्यनिश्चये** MV **7 ॰त्रयरहित॰** ] MV$L_1$; **॰त्रयाहित॰** $K_1$ **11 स्वनिश्चये च** ] $K_1$; **स्वनिश्चये** MV$L_1$ **12 ॰पेक्षत्वात्** ] V$K_1L_1$; **॰पेक्षत्वादुभयत्रापि** M **14 ॰त्रयस्या॰** ] $M^{kha}$V$K_1L_1$; **॰त्रयस्याय॰** M; **॰त्रयस्याप्य॰** $M^{en}$

[3.4.1 निश्चयः परतः]

ननु चोत्पत्तिवेलायां न विशेषो ऽवधार्यते।
प्रमाणेतरयोस्, तेन बलाद् भवति संशयः॥

परिच्छित्तिमात्रं हि प्रमाणकार्यम्। तच्च यथार्थेतरप्रमितिसाधारणं रूपम्। साधारणधर्मग्रहणं च संशयकारणमिति प्रसिद्धः पन्थाः। एवं च स्थिते

प्रमाणान्तरसंवादविसंवादौ विना कथम्।
प्रमाणेतरनिर्णीतिर्, अतश्च परतो द्वयम्॥

[3.4.2 प्रामाण्यमौत्सर्गिकम्]

तदेतदचतुरस्रम्। सत्यं परिच्छित्तिरेव प्रमाणकार्यम्। सा पुनरुपजायमानैव न सन्देहादिदूषिततनुरुपलभ्यत इत्यौत्सर्गिकं प्रामाण्यमेव सा भजते। अर्थपरिच्छेदाच्च प्रवर्तमानः प्रमाता प्रमाणेनैव प्रवर्तितो भवति, न संशयात्प्रवृत्तः। स्थिते चैवमौत्सर्गिके प्रामाण्ये यत्र त-

---

**2 ननु ··· परतो द्वयम्** ] Cf. *Tātparyaṭīkā* ad *codanā* 34: अपरे तु मन्यन्ते। प्रामाण्यं नाम स्वालम्बननिश्चायकत्वम्। न च प्रमाणान्तरसंवादमनपेक्ष्योत्पन्नमात्रं (°संवादमनपेक्ष्योत्पन्नमात्रं ms.; °संवादानपेक्षमुत्पन्नमात्रं ed.) विज्ञानं निश्चायकम्, प्रमाणेतरयोस्तदानीं विशेषाप्रतिभासनाद् विशेषावसायनिबन्धनत्वाच्च निश्चयस्य। अतो विज्ञानकारणेषु ये गुणदोषास्तदवधारणात् प्रामाण्यमप्रामाण्यं वेति द्वयं परतः।

**4 परिच्छित्तिमात्रं** ] *Tātparyaṭīkā* ad *codanā* 48: ननु न परिच्छेदमात्रं प्रमाणकार्यम्, अप्रमाणादप्युपपत्तेः। परिच्छितिविशेषं तु नागृहीतप्रामाण्यं विज्ञानं जनयति, प्रागर्थक्रियासंवादात्प्रमाणेतरकृतपरिच्छेदविशेषानुपलब्धेः।

---

**4 हि** ] $K_1$; om. $MVL_1$ **6 एवं च स्थिते** ] $VK_1L_1$; एवं स्थिते च M **7 प्रमाणान्तर°** ] $MVL_1$; प्रमाणेतर° $K_1$ **7 °संवाद°** ] MV; °संवादे $K_1$; °संवादा° $L_1$ **7 °विसंवादौ** ] $MVL_1$; संवादौ $K_1$(unmetrical) **10 °चतुरस्रम्** ] $MVK_1L_1^{pc}$; °चतुरस्रय $L_1^{ac}$ **12 प्रमाणेनैव** ] $MVL_1$; प्रमाणैरेव $K_1$ **12 प्रवर्तितो** ] $MVL_1$; प्रवृत्तितो $K_1$ **13 स्थिते** ] $MK_1$; स्थितिश् $M^{kha}VL_1$ **13 प्रामाण्ये** ] $MVK_1$; प्रामाण्य $L_1$

स्यापवादः क्वचिद् भवति तत्राप्रामाण्यम्।

[3.4.3 अपवादद्वैविध्यम्]

अप्रामाण्ये चावश्यंभाव्यपवादः। द्विविध एव च तदपवादो बाधकप्रत्ययः कारणदोषज्ञानं च। तदुक्तं भाष्यकृता "यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीनः प्रत्ययः, नान्यः" इति। वार्त्तिककारोऽप्याह—

तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते॥ इति।

[3.4.3.1 बाधकज्ञानम्]

तत्र बाधकज्ञानं पूर्वज्ञानोपमर्दद्वारेणैव तस्मिन् विषये जायत इति समानविषयत्वात्स्पष्टमेव बाधकम्।

[3.4.3.2 कारणदोषज्ञानम्]

कारणदोषज्ञानं तु भिन्नविषयमपि कार्यैक्याद् बाधकतां प्रतिपद्यते। यथा "चमसेनापः प्रणयति" इति दर्शपूर्णमासाङ्गत्वात्क्रत्वर्थश्चम-

---

**4** *Śābarabhāṣya* ad 1.1.3–5 (1.1.4a), F 26.19–20: तस्माद्यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः, स एवासमीचीनः प्रत्ययो नान्य इति।
**7** तस्माद् ⋯ ॰दपोद्यते ] *Ślokavārttika codanā* 53.
**8** *Nyāyamañjarīgranthibhaṅga* 75.20–21: अर्थान्यथात्वेति। अर्थान्यथात्वज्ञानात् 'शुक्तिकेयं न रजतम्' इत्यादौ, हेतूत्थदोषज्ञानात् कारणदोषज्ञानाद् द्विचन्द्रज्ञानादौ।
**14** *Tātparyaṭīkā* ad *codanā* 58: यद्यपि दोषज्ञानं दोषविषयत्वेन पूर्वस्माद् भिन्नविषयम्, तथापि दोषाणामयथार्थज्ञानहेतुत्वात्तज्ज्ञानादन्यथात्वमर्थस्य, पू-

---

**3** चावश्यं॰ ] MVK$_1$; चवाश्यं॰ L$_1$ **3** एव च तदपवादो ] K$_1$; एवापवादो M; एव तदपवादः VL$_1$ **4** यस्य च ] K$_1$; यत्र MVL$_1$ **4** करणं ] K$_1$; कारणं MVL$_1$ **10** ॰ज्ञानं ] MVK$_1$; ॰ज्ञान L$_1$ **10** विषये ] MVK$_1$; विषय L$_1$ **14** प्रणयति" इति ] MK$_1$L$_1$; प्रणयन्तीति V

सः। “गोदोहनेन पशुकामस्य प्रणयेत्” इति काम्यमानपशुनिर्देशात् पुरुषार्थं गोदोहनमित्येवं क्रत्वर्थपुरुषार्थतया भिन्नविषयत्वे ऽपि चमसगोदोहनयोः प्रणयनाख्यं कार्यमेकमिति गोदोहनेन निर्वृत्ते तस्मिंश्चमसो निवर्तते।

एवमिह कारणदोषज्ञानं दोषविषयमपि दोषाणामयथार्थज्ञानजननस्वभावत्वात्तस्य ज्ञानस्य याथार्थ्यं बाधते। तदुक्तम्—

---

र्वज्ञानात्तथात्वमिति एकार्थत्वमस्तीति विरोधः, यथा क्रत्वर्थपुरुषार्थत्वेन भिन्नविषययोरपि चमसगोदोहनयोरवान्तरव्यापारैक्येन बाध्यबाधकभावः।; *Nyāyamañjarīgranthibhaṅga* 75.22–25: **चमसेनापः प्रणयन्तीति। चमसेन यज्ञपात्रविशेषेण अपः प्रणयन्ति विशिष्टेन मन्त्रेण प्राङ् नयन्ति, गार्हपत्यदेशादाहवनीयदेशं नयन्ति। पिष्टसंयवनाद्यर्थं ताभिस्संयुते पिण्डीकृते पिष्टे पुरोडाशनिर्वृत्तिद्वारेणाग्नेयो ऽष्टाकपालो भवतीति प्रधानयागनिर्वृत्तेः क्रतूपकारकत्वात् क्रत्वर्थश्चमसः।**
**1** *Nyāyamañjarīgranthibhaṅga* 76.1–12: **गोदोहनेन पशुकामस्य प्रणयेदिति। यः पशुकामो यजमानस्तदर्थं गावो दुह्यन्ते यस्मिन् पात्रे तेनाध्वर्युरपां प्रणयनं कुर्यात्; अत्र गोदोहनमिष्टपशुसम्पादकत्वेन पुरुषेणार्थ्यमानत्वात् पुरुषार्थम्, क्रतोस्तु चमसकृतेनैव प्रणयनेनोपकारसिद्धेः क्रतुनाऽनपेक्षमाणत्वान्न क्रत्वर्थम्। तदेवमनयोः क्रत्वर्थपुरुषार्थत्वेन भिन्नविषयत्वे ऽपि गोदोहनं प्रणयनमकुर्वन्न फलाय प्रभवति, क्रियामनाश्रित्य कारणस्य शुद्धस्य फलं जनयितुमसामर्थ्यात्; अतस्तेन प्रणयनमवश्यं कार्यम्; तेन चेत् प्रणयनं क्रियते कृतत्वात् प्रणयनस्य तेनैव संयवनादिकार्यसिद्धेरर्थाच्चमसो निवर्तते। नन्वत्रास्त्वेककार्यत्वान्निवृत्तिः, दार्ष्टान्तिके तु द्विचन्द्रज्ञानदोषज्ञानादौ कीदृश्येककार्यता? उच्यते। एकस्मिन्नर्थे तथात्वातथात्वप्रदर्शनेन व्यापार एककार्यत्वम्। दोषज्ञानम् ‘दुष्टं मे चक्षुः’ इति ज्ञानम् दोषाणामयथार्थज्ञानजननद्वारेण द्विचन्द्रज्ञानप्रतिभासिनो ऽर्थस्यातथात्वं ज्ञापयति, द्विचन्द्रज्ञानं तु तथात्वमेव स्वप्रतिभासस्यार्थस्यावेदयते; न वै तत् तथात्वमतथात्वं चैकस्य वस्तुनः सम्भवतीत्यर्थाद् बाध इत्यर्थः।**

---

**2 पुरुषार्थं** ] $K_1L_1$; **पुरुषार्थो** M; **पुरुषार्थ॰** $M^{kha}V$　**2 गोदोहनमित्येवं … गोदोहनेन** ] $MK_1L_1$; **॰गोदोहनेन** $M^{kha}V$(eyeskip)　**3 चमस॰** ] $ML_1$; **चमसं** $K_1$　**3 ॰दोहनयोः** ] $MK_1$; **॰दोहनयो** $L_1$　**3 ॰नाख्यं** ] $K_1L_1$; **॰नाख्य॰** M **5 कारणदोषज्ञानं दोषविषयमपि** ] $MVL_1^{pc}$; **कारणदोषविषयमपि** $K_1$; **कारणदोषदोषज्ञानं दोषविषयमपि** $L_1^{ac}$　**6 ॰ज्ञानजनन॰** ] $MVK_1$; **॰ज्ञानं जन॰** $L_1$ **6 याथार्थ्यं** ] $K_1$; **प्रामाण्यं** $MVL_1$

दुष्टकारणबोधे तु जाते ऽपि विषयान्तरे।
अर्थात्तुल्यार्थतां प्राप्य बाधो गोदोहनादिवत्॥ इति।

[3.4.3.3 अपवादाशङ्का]

[3.4.3.3.1 शङ्काया अभावः]

यत्र पुनरिदमपवादद्वयमपि न दृश्यते तत्र तदौत्सर्गिकं प्रामाण्यमनपोदितमास्त इति न मिथ्यात्वशङ्कायाः किंचिन्निमित्तम्। यथाह—

दोषज्ञाने त्वनुत्पन्ने नाशङ्का निष्प्रमाणिका। इति।

तथा हि

कश्चिदुत्पन्न एवेह स्वसंवेद्यो ऽस्ति संशयः।
स्थाणुर्वा पुरुषो वेति, को नामापह्नुवीत तम्॥
हठादुत्पाद्यमानस्तु हिनस्ति सकलाः क्रियाः।

---

**1** दुष्टकारणबोधे ··· गोदोहनादिवत् ] *Ślokavārttika codanā* 58.

**5** यत्र ··· किंचिन्निमित्तम् ] *Tātparyaṭīkā* ad *codanā* 60cd: यत्पुनः “इदमित्थम्” इति वस्तुतथात्वनिश्चायकमुत्पद्यते, न च बाधकप्रत्ययः कारणदोषज्ञानं वा, तत्रेयमाशङ्का “क्वचिद्व्यभिचारदर्शनादन्यथाभावः स्यात्” इति न युक्ता विवेकिना कर्तुम्।

**7** *Ślokavārttika codanā* 60cd.

**10** Cf. *Tātparyaṭīkā* ad *codanā* 60cd: यत्तावदुभयकोटिसंस्पर्शितयानवधारितैकान्तिकं विज्ञानमुत्पद्यते, तस्य युक्तमप्रामाण्यम्।

**11** Cf. *Tātparyaṭīkā* ad *codanā* 60cd: यत्त्वनुत्पन्न एव संशयः क्वचिद्व्यभिचारदर्शनाद् बलादुत्पाद्यते, अत्र प्रतीतिविरोधः।

---

**1** °बोधे ] MVK$_1$; °बोध L$_1$ **2** °ल्यार्थतां ] MVK$_1$; °ल्यतां L$_1$(unmetrical) **2** °दिवत्॥ इति ] MVK$_1$; °दितिवदि L$_1$ **5** तदौत्सर्गिकं ] MVK$_1$; तदौत्सन्निकं L$_1$ **6** °मनपोदितमास्त इति ] MVL$_1$; °मनपनोदितास्त एवेति K$_1$ **6** °त्वशङ्कायाः किंचिन्निमित्तम् ] K$_1$; °त्वाशङ्कायां निमित्तं किंचित् MVL$_1$ **6** यथाह ] K$_1$; यदाह MVL$_1$ **7** °ने त्वनुत्पन्ने ] MVK$_1$; °ने ऽनुत्पन्ने L$_1$(unmetrical) **7** नाशङ्का ] VK$_1$L$_1$; नाशङ्क्या M **7** निष्प्रमाणिका ] VK$_1$L$_1$; निष्प्रमाणता M **11** °दुत्पाद्यमानस्तु ] MVL$_1$; °दुत्पद्यमानस्तु K$_1$

स्वभार्यापरिरम्भे ऽपि भवेन् मातरि संशयः॥
विनाशी संशयात्मेति पाराशर्यो ऽप्यभाषत।
नायं लोको ऽस्ति कौन्तेय न परः संशयात्मनः॥ इति।

[3.4.3.3.2 तृतीयज्ञानसंवादः]

यत्रापि क्वचिद्बाधकप्रत्यये संशयो जायते, तत्रापि तृतीयज्ञानापेक्षणान्नानवस्था। न च स्वतःप्रामाण्यहानिः। यदि प्रथमविज्ञानसंवादि तृतीयज्ञानमुत्पद्यते, तत् प्रथमस्य प्रामाण्यमौत्सर्गिकं स्थितमेव। द्वितीयविज्ञानारोपितालीककालुष्यशङ्कानिराकरणं त्वस्य तृतीयेन क्रियते। न त्वस्य तत्संवादात्प्रामाण्यम्।

यदि तु द्वितीयज्ञानसंवादि तृतीयं ज्ञानं तदा प्रथमस्याप्रामाण्यम्। तच्च परत इष्टमेव। द्वितीयस्य तु ज्ञानस्य न तृतीयसंवादकृतं प्रामाण्यम्। अपि तु कल्प्यमानकुशङ्काशमनमात्रे तस्य व्यापारः। उक्तं च—

एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः।

---

**2** विनाशी संशयात्मेति ] See section 4.2.1.3.2.5.
**2** *Bhagavadgītā* 4:40 (*Mahābhārata* 6:26:40): अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति। नायं लोको ऽस्ति न परो न सुखं संशयात्मनः॥
**14** एवं ··· °मश्नुते ] *Ślokavārttika codanā* 61.
**14** *Nyāyamañjarīgranthibhaṅga* 76.13: त्रिचतुरज्ञानजन्मनो नाधिकेति। जन्मन

---

**1** स्वभार्या° ] MVL$_1$; स्वाभार्या° K$_1$ **5** यत्रापि ] VK$_1$L$_1$; यत्रापि च M **5** तृतीय° ] MVK$_1$; om. L$_1$ **6** °नापेक्षणा° ] MVL$_1$; °नोपेक्षणा° K$_1$ **6** न च ] VK$_1$L$_1$; न च तावता M **6** यदि ] K$_1$; यत्र MVL$_1$ **6** प्रथम° ] MVK$_1$; प्रथमि° L$_1$ **7** °संवादि ] MVL$_1$; °संभवादि K$_1$ **7** °मुत्पद्यते ] MVK$_1$; °मुत्पाद्यते M$^{ka}$L$_1$ **7** तत् ] VK$_1$L$_1$; तत्र M **8** द्वितीयविज्ञानारो° ] MVK$_1$; द्वितीतविज्ञानरो° L$_1$ **8** °तालीक° ] MVK$_1$; °तालेक° L$_1$ **9** तृतीयेन ] MVL$_1$; तृतीयन K$_1$ **9** तत्संवादात्प्रा° ] K$_1$; संवादात्प्रा° MV; संवात्प्रा° L$_1$ **11** न ] MV; om. K$_1$L$_1$ **12** प्रामाण्यम् ] MVK$_1$; प्रामाण्यम् तच्च परत इष्टमेव L$_1$ **12** कल्प्यमान° ] K$_1$; संकल्प्यमान° MVL$_1$ **12** °शमन° ] K$_1$; °चमन° MVL$_1$

प्राथ्य्र्यते, तावतैवैकं स्वतः प्रामाण्यमश्नुते॥ इति।

## [3.4.4 शब्दप्रामाण्यम्]

### [3.4.4.1 प्रामाण्यं स्वतः]

तदेवं सर्वप्रमाणानां स्वतः प्रामाण्ये सिद्धे समानन्यायतया शब्दस्यापि तथैव प्रामाण्यं भवति।

### [3.4.4.2 अप्रामाण्यं परतः]

न च नैसर्गिकमर्थासंस्पर्शित्वमेव शब्दस्वरूपमिति परीक्षितमेतत्। किं त्वर्थबोधजनकत्वात्तस्य नैसर्गिके प्रामाण्ये सति पुरुषदोषानुप्रवेशकृतः क्वचिद् विप्लवः। तदुक्तम्—

शब्दे दोषोद्भवस्तावद्वक्त्रधीन इति स्थितम्। इति।

### [3.4.4.3 दोषाभावः]

तत्र पौरुषेये वचसि गुणवति वक्तरि सति तद्गुणापसारितदोषतया तत्प्रामाण्यमौत्सर्गिकमनपोदितं भवति, न तु गुणकृतं तत्प्रामाण्यम्, अनङ्गत्वात्प्रामाण्ये गुणानाम्। बोधकत्वनिबन्धनमेव तदित्युक्तम्।

---

इति पञ्चमी।

**7 परीक्षितमेतत्** ] *Nyāyamañjarī* I 419.15–16: तेनाभिधातृदौरात्म्यकृतेयमयथार्थता। प्रत्ययस्येति शब्दानां नार्थासंस्पर्शिता स्वतः॥

**10** *Ślokavārttika codanā* 62ab. (Both readings, स्थितम् and स्थितिः, are found in *Ślokavārttika* manuscripts.)

**10** *Nyāyamañjarīgranthibhaṅga* 76.14: वक्त्रधीन इति स्थितमित्यस्यापरमर्धम्—'तदभावः क्वचित्तावद् गुणवद्वक्तृकत्वतः' इति।

**13** Cf. section 3.4.2: औत्सर्गिकं प्रामाण्यमेव सा (परिच्छित्तिर्) भजते।

**14 °त्युक्तम्** ] See *Ślokavārttika codanā* 53 quoted at 3.4.3.; cf. also *Tātparya-*

---

**1 तावतैवैकं** ] MV; तावतैवैके $M^{ka}L_1$; तावतेवैकं $K_1$ **7 शब्द°** ] $K_1$; शब्दस्य $MVL_1$ **9 °कृतः** ] $K_1$; °कारितः $MVL_1$ **9 क्वचिद्** ] $K_1$; क्वचिद्धि $MVL_1$ **10 दोषोद्भव°** ] $MVL_1$; दोषात्भव° $K_1$ **10 स्थितम्** ] $MVL_1$; स्थितिः $K_1$ **10 इति** ] M; om. $VK_1L_1$ **12 सति** ] $K_1$; om. $MVL_1$

### [3.4.4.4 वेदप्रामाण्यम्]

वेदे तु प्रणेतुः पुरुषस्याभावाद् दोषाशङ्कैव न प्रवर्तते, वक्त्रधीनत्वाद्दोषाणाम्। न च बाधकप्रत्ययो ऽद्य यावद्वेदार्थे कस्यचिदुत्पन्न इति निरपवादं वेदप्रामाण्यम्। आह च—

तत्रापवादनिर्मुक्तिर्वक्त्रभावाल्लघीयसी।
वेदे तेनाप्रमाणत्वं नाशङ्कामधिगच्छति॥ इति।

तदिदमुक्तम् "तत्प्रमाणं बादरायणस्यानपेक्षत्वात्" इति।

गिरां मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात्।
अपौरुषेयं सत्यार्थमिति युक्तं प्रचक्षते॥
गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयात्।

---

*ṭīkā* ad *codanā* 47 (50.5–6): अपरे तु मन्यन्ते। बोधकत्वं नाम प्रामाण्यम्। तच्च विज्ञानानां स्वाभाविकमेव न गुणकृतम्, गुणाभावे ऽपि विपर्ययज्ञाने सद्भावादिति स्वतः प्रामाण्यम्।

**5** तत्रा° ··· °धिगच्छति ] *Ślokavārttika codanā* 68.

**5** *Nyāyamañjarīgranthibhaṅga* 76.16: वक्त्रभावाल्लघीयसी अयत्नसिद्धा।

**7** *Nyāyamañjarīgranthibhaṅga* 76.17–18: तत् प्रमाणं बादरायणस्येति। तत् शाब्दं बादरायणस्याचार्यस्य मते ऽनपेक्षत्वात् प्रमाणम्, अन्यानपेक्षं प्रमाणं स्वत एव प्रमाणमित्यर्थः।

**8** *Nyāyamañjarīgranthibhaṅga* 76.19–26: एवं मीमांसकदृष्ट्या स्वतः प्रामाण्यं प्रतिपाद्य वेदस्य तदप्रामाण्ये धर्मकीर्तेः श्लोकद्वयम्—गिरां मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात्। अपौरुषेयं सत्यार्थमिति केचित् प्रचक्षते॥ इत्येकं मीमांसकमतानुवादतया व्यवस्थितमपरं च तत्प्रतिषेधाय—गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयात्। अपौरुषेयं मिथ्यार्थं किन्नेत्यन्ये प्रचक्षते॥ इति व्यत्ययेनेति—तदिदानीं यथा पठितुं युज्यते तथा पठितुमाह—गिरां मिथ्यात्वहेतूनामित्यादिना।

---

**2** दोषाशङ्कैव ] MVK$_1$; दोषशङ्कैव L$_1$ **4** वेद° ] MVK$_1$; वेदे L$_1$ **6** ना° ] K$_1$; न MVL$_1^{pc}$; om. L$_1^{ac}$(unmetrical) **7** °नपेक्ष° ] MVK$_1$; °नपेक्षि° L$_1$ **8** दोषाणां ] MVK$_1$; गुणानां L$_1$ **9** अपौरुषेयं ] MVK$_1$; पौरुषेयं तु M$^{ga}$; अपौरुषेये L$_1$ **9** युक्तं ] MVK$_1$; युक्ते L$_1$

अपौरुषेयं मिथ्यार्थमित्ययुक्तं तु मन्वते॥
न हि पुरुषगुणानां सत्यतासाधनत्वम्
वचसि खलु निसर्गादेव सत्यत्वसिद्धिः।
गुणमपि नरवाचां विप्लवाधायिदोष-
प्रशमनचरितार्थं सङ्गिरन्ते गुणज्ञाः॥

## [4 सिद्धान्तः]

### [4.1 वेदप्रामाण्यनिश्चयः]

अत्राभिधीयते। प्रत्यक्षादिषु दृष्टार्थेषु प्रमाणेषु प्रामाण्यनिश्चयमन्तरेणैव व्यवहारसिद्धेस्तत्र किं स्वतः प्रामाण्यम् उत परत इति विचारेण न नः प्रयोजनम्, अनिर्णय एव तत्र श्रेयान्।

अदृष्टे तु विषये वैदिकेष्वगणितद्रविणवितरणादिक्लेशसाध्येषु कर्मसु तत्प्रामाण्यावधारणमन्तरेण प्रेक्षावतां प्रवर्तनमनुचितमिति तत्प्रामाण्यनिश्चयो ऽवश्यकर्तव्यः। तत्र परत एव वेदस्य प्रामाण्यमिति वक्ष्यामः।

### [4.2 स्वतःप्रामाण्यदूषणम्]

यच्चेदमियता विस्तरेण स्वतः प्रामाण्यमुपपादितं तद् व्याख्येयम्।

---

**11** Cf. *Nyāyamañjarī* I 14.9–15.2: वेदे ह्यसिद्धप्रामाण्ये महाक्लेशेषु कर्मसु। नानर्थशङ्कया युक्तम् अनुष्ठानप्रवर्तनम्॥ बहुवित्तव्ययायासवियोगसुगमे ऽध्वनि। प्रवृत्तिरुचितोदारफले लघुपरिश्रमे॥
**14 वक्ष्यामः** ] *Nyāyamañjarī* I 610.11: तस्मादाप्तोक्तत्वादेव वेदाः प्रमाणमिति सिद्धम्।

---

**1 अपौरुषेयं** ] $M^{en}VK_1$; **पौरुषेयं तु** M; **अपौरुषेय॰** $L_1$ **1 मिथ्यार्थ॰** ] $M^{en}$; **सत्यार्थ॰** $MVL_1$; **मित्थ्यात्व॰** $K_1$ **4 ॰वाचां** ] $MVK_1$; **॰वचां** $L_1$ **8 प्रत्यक्षादिषु** ] $MVK_1$; **प्रत्यक्षा॰** $L_1$ **9 ॰निश्चयमन्तरेणैव** ] $MVL_1$; **॰निश्चय** $K_1$ **9 ॰स्तत्र** ] $MVL_1$; **॰स्तत्** $K_1$ **11 ॰क्लेश॰** ] $MVK_1$; **॰क्लेषु॰** $L_1$ **13 तत्प्रा॰** ] $K_1$; **तस्य प्रा॰** $MVL_1$ **13 तत्र** ] $MVL_1$; **तत्र च** $K_1$ **16 यच्चेद॰** ] $MVK_1L_1$; **तच्चेद॰** $M^{ka}$

स्वतः प्रामाण्यमिति को ऽर्थः। किं स्वत एव प्रमाणस्य प्रामाण्यं भवति, उत स्वयमेव तत्प्रमाणमात्मनः प्रामाण्यं गृह्णातीति।

[4.2.1 स्वतो ग्रहणम्]

न तावत्स्वयमेव प्रामाण्यग्रहणमुपपन्नम्, अप्रमाणिकत्वात्। तथा हि यदेतन्नीलप्रकाशने प्रवृत्तं प्रत्यक्षं तन्नीलं प्रति तावत्प्रत्यक्षं प्रमाणम् इन्द्रियार्थसन्निकर्षोत्पन्नमिति जानीम एवैतत्। किमत्र विचार्यते।

स्वप्रामाण्यपरिच्छेदे तु किं तत्प्रमाणमिति चिन्त्यतां प्रत्यक्षमनुमानं वा, प्रमाणान्तराणामनाशङ्कनीयत्वात्।

[4.2.1.1 न प्रत्यक्षेण प्रामाण्यग्रहणम्]

न तावत्स्वप्रामाण्यपरिच्छेदे तत्प्रत्यक्षं प्रमाणम्। तद्धि ज्ञानस्य प्रामाण्यं गृह्णीयात् तत्फलस्य वा।

[4.2.1.1.1 ज्ञानव्यापारप्रामाण्यग्रहणम्]

तत्र ज्ञातृव्यापारात्मनो ज्ञानस्य भवन्मते नित्यपरोक्षत्वात् प्रत्यक्ष-

---

**13** भवन्मते ] See, e.g. *Nyāyamañjarī* I 42.15–43.2: शाबरास्तु ब्रुवते। ⋯ वयं तु विज्ञानाद् भिन्नमेव फलं दृष्टताख्यमभ्युपगच्छामः। तेनैव तदनुमीयते। ज्ञानं हि नाम क्रियात्मकम्, क्रिया च फलानुमेया, ज्ञातृव्यापारमन्तरेण फलानिष्पत्तेः।; I 44.2–7: परोक्षो ऽपि चासौ विषयप्रकाशतालक्षणेन फलेन कल्प्यते। तदाह भाष्यकारः—"न ह्यज्ञाते ऽर्थे कश्चिद् बुद्धिमुपलभते, ज्ञाते त्वनुमानादवगच्छति" इति। वार्त्तिककृताप्युक्तम्—"नान्यथा ह्यर्थसद्भावो दृष्टः सन्नुपपद्यते। ज्ञानं चेन्नेत्यतः पश्चात्प्रमाणमुपकल्प्यते॥ (*Ślokavārttika śūnya* 182) इति। तदेष फलानुमेयो ज्ञातृव्यापारो ज्ञानादिशब्दवाच्यः प्रमाणम्।

---

**4** अप्रमाणिकत्वात् ] $K_1L_1$ ; अप्रामाणिकत्वात् MV **5** प्रमाणम् ] $K_1L_1$ ; प्रमाणं तावद् MV **6** इन्द्रिया° ] $MVK_1$ ; इन्द्रिय° $L_1$ **7** स्वप्रामाण्य° ] $K_1$ ; प्रामाण्य° $MVL_1$ **7** चिन्त्यतां ] $MVK_1$ ; चिन्त्यम् $M^{ka}$ **8** °मनाशङ्क° ] MV; °मनशंक° $K_1$ ; °मनाशशङ्क° $L_1$ **10** तद्धि ज्ञानस्य ] $K_1$ ; तद्धि ज्ञानस्य वा $ML_1$ ; तद्धिज्ञानस्य वा V **13** °व्यापारात्मनो ] $MVK_1$ ; °व्यापरात्मनो $L_1$

तः परिच्छेदानुपपत्तौ तत्प्रामाण्यस्यापि कथं प्रत्यक्षेण ग्रहणम्।

[4.2.1.1.2 **फलप्रामाण्यग्रहणम्**]

[4.2.1.1.2.1 **इन्द्रियज्ञानम्**]

तत्फलस्याप्यर्थप्रकाशनाख्यस्य संवेदनात्मनो नेन्द्रियसंसर्गयोग्यता विद्यते येन तद्गतमपि यथार्थत्वलक्षणं प्रामाण्यमिन्द्रियव्यापारलब्धजन्मना प्रत्यक्षेण परिच्छिद्येत।

[4.2.1.1.2.2 **मानसप्रत्यक्षम्**]

न च मानसमपि प्रत्यक्षं फलगतयथार्थतावसायसमर्थमिति कथनीयम्, तदानीमननुभूयमानत्वात्। न हि नीलसंवित्प्रसवसमनन्तरम् “यथार्थेयं नीलसंवित्तिः” इति संवेदनान्तरमुत्पद्यमानमनुभूयते। अनुभवे वा ततो द्वितीयात्प्रथमोत्पन्ननीलसंवेदनयाथार्थ्यग्रहणान्न स्वतः प्रामाण्यनिश्चयः स्यात्। तस्मान्न प्रत्यक्षस्यैष विषयः।

[4.2.1.2 **नानुमानेन प्रामाण्यग्रहणम्**]

अनुमानेनापि कस्य प्रामाण्यं निश्चीयेत। ज्ञानस्य फलस्य वेति पूर्ववद्वाच्यम्।

[4.2.1.2.1 **फलप्रामाण्यनिश्चयः**]

---

**1 °परोक्षत्वात् प्रत्यक्षतः** ] $VL_1$; °परोक्षत्वात् प्रत्यक्षस्य स्वतः M; °परोक्षत्वात् $K_1$ **4 तत्फल°** ] $K_1$; फल° $MVL_1$ **4 °प्रकाशना°** ] $MVL_1$; °प्रकाशता° $K_1$ **4 संवेदनात्मनो** ] $MVK_1$; संवेदेनात्मनो $L_1$ **9 °मननुभूय°** ] MV; °मनुभूय° $K_1L_1$ **10 संवेदना°** ] $MVK_1$; संवदना° $L_1$ **11 °संवेदन°** ] $K_1$; °ज्ञान° $MVL_1$ **11 °याथार्थ्य°** ] $MVL_1$; °यथार्थ्य° $K_1$ **12 प्रत्यक्षस्यैष** ] $MVK_1$; प्रत्यक्षैष $L_1$ **12 विषयः** ] $MVK_1$; विषया $L_1$ **14 निश्चीयेत** ] $K_1$; निश्चीयते $MVL_1$ **14 फलस्य वेति** ] MV; फलस्य चेति $K_1$; फलस्येव $L_1$ **15 °द्वाच्यम्** ] $MK_1L_1$; °द्वाद्यम् $M^{kha}V$

फलस्य तावत्तन्निश्चये लिङ्गमेव न किंचिदुत्पश्यामः।

### [4.2.1.2.2 ज्ञानप्रामाण्यनिश्चयः]

ज्ञातृव्यापारात्मनस्तु ज्ञानस्य स्वकार्यं फलं भवदपि लिङ्गं फलस्य क्रियामात्रव्याप्तिग्रहणात् स्वरूपसत्तामात्रमनुमापयितुमुत्सहते, न यथार्थत्वलक्षणं प्रामाण्यम्। तद्धि फलं निर्विशेषणं वा स्वकारणस्य ज्ञातृव्यापारस्य प्रामाण्यमनुमापयेद् यथार्थत्वविशिष्टं वा।

### [4.2.1.2.2.1 निर्विशेषणम्]

आद्ये पक्षे यतः कुतश्चन फलात्तत्प्रामाण्यानुमाने नेदानीं किंचिदप्रमाणं भवेत्।

### [4.2.1.2.2.2 यथार्थत्वविशिष्टम्]

उत्तरो ऽपि नास्ति पक्षः, फलगतयाथार्थ्यपरिच्छेदोपायाभावादित्युक्तम्।

### [4.2.1.3 स्वानुभवेन]

### [4.2.1.3.1 उत्पत्तिकाले गृह्यते]

ननु स्वानुभव एवात्रोपायः। तद्धि नीलसंवेदनतया फलं स्वत एव प्रकाशते। नीलसंवेदनत्वमेवास्य यथार्थत्वं नान्यत्। यद्येवम्,

---

**12 °त्युक्तम्** ] See section 4.2.1.1.2.

---

**1 तावत्तन्निश्चये** ] $MVK_1L_1$ ; तावतुर्निश्चये $M^{ka}$ **1 लिङ्गमेव** ] $M^{en}K_1L_1$ ; लिङ्गत्वमेव MV **1 न** ] $K_1$ ; तावन्न $MVL_1$ **1 किंचिदुत्प°** ] $K_1$ ; कस्यचित्प° MV; किंचित्प° $M^{en}L_1$ **3 °नस्तु ज्ञानस्य** ] $K_1$ ; °नो ज्ञानस्य तु $MVL_1$ **3 स्वकार्यं** ] $MVK_1L_1$ ; स्वकार्य° $M^{en}$ **3 फलं** ] $M^{en}VK_1L_1$ ; om. M **3 भवदपि** ] $M^{ka}M^{en}K_1L_1$ ; भवेदपि MV **4 लिङ्गं फलस्य** ] $MVL_1$ ; लिङ्गफलस्य $M^{en}$ ; न लिङ्गम् फलस्य $K_1$ **4 क्रियामात्र°** ] $MVL_1$ ; क्रियामात्रे $K_1$ **6 ज्ञातृ°** ] $MVK_1$ ; ज्ञान° $M^{ka}L_1$ **8 नेदानीं** ] $VK_1L_1$ ; नेदानिं M **8 किंचिद°** ] $MVL_1$ ; किञ्चिना° $K_1$ **15 स्वानुभव** ] $MK_1$ ; सानुभव $M^{kha}L_1$ ; सो ऽनुभव V **16 °मेवास्य** ] $K_1$ ; °मेव चास्य $MVL_1$

शुक्तिकायामपि रजतसंवेदने समानो ऽयं न्यायः। न हि रजतसंवेदनादन्या यथार्थत्वसंवित्तिरिति।

ननु तत्र बाधकप्रत्ययोपनिपातेन यथार्थत्वमपनीयते। नूनं च मिथ्यादर्शनेषु—देशान्तरे वा शुक्तिकारजतज्ञाने, कालान्तरे वा कूटकाञ्चनादिप्रतीतौ, पुरुषान्तरे वा जाततैमिरिकद्विचन्द्रप्रतीतौ, अवस्थान्तरे वा पीतशङ्खादिप्रतिभासे—भवति बाधकप्रत्ययः। तदसत्त्वे तु न तच्छङ्का युक्तिमतीत्युक्तमेव।

सत्यमुक्तमयुक्तं तु। एवं हि वदता बाधकाभावज्ञानाधीनं प्रामाण्यमभिहितं भवति। तच्च तात्कालिकं कालान्तरभावि वेति विकल्प्यमानं नोपपद्यत इति दर्शितम्। तस्मादुत्पद्यमानमेव प्रमाणमात्मनः प्रामाण्यं निश्चिनोतीति न युक्तमेतत्।

[4.2.1.3.2 संशयात् प्रवृत्तिः]

[4.2.1.3.2.1 विप्रलम्भः]

यदि प्रसवसमय एव ज्ञानस्य प्रामाण्यं निश्चिनुयाम, तर्हि ततः प्रवर्तमाना न क्वचिदपि विप्रलभ्येमहि, विप्रलभ्यामहे तु। तेन म-

**7** ॰त्युक्तमेव ] See section 3.4.3.3.1.
**10** दर्शितम् ] See section 3.3.3.2.

**1** शुक्तिकायामपि ] MVL$_1$; शुक्तिकायमपि K$_1$ **1** ऽयं ] K$_1$; om. MVL$_1$ **2** यथार्थत्व॰ ] MVK$_1$; यथार्थ॰ L$_1$ **3** ॰प्रत्ययो॰ ] MVL$_1$; ॰प्रत्यक्षो॰ K$_1$ **3** ॰न यथा॰ ] M$^{ka}$K$_1$; ॰नायथा॰ MVL$_1$ **3** ॰मपनीयते ] K$_1$; ॰मुपनीयते MVL$_1$ **4** च ] K$_1$; चास्य MVL$_1$ **4** देशान्तरे ] MV; देशान्ते L$_1$ **4** ॰रजत॰ ] K$_1$; ॰रजतादि॰ MVL$_1$ **5** कालान्तरे वा ] VK$_1$L$_1$; कालान्तरे M **5** ॰काञ्चनादि॰ ] em.; ॰कार्षापणादि॰ MVL$_1$; ॰काञ्च+दि॰ K$_1$ **5** ॰तैमिरिक॰ ] K$_1$; ॰तैमिरिके MVL$_1$ **6** ॰प्रतीतौ, अव॰ ] MVL$_1$; ॰प्रतिमाव॰ K$_1$ **6** अवस्थान्तरे वा ] K$_1$; अवस्थान्तरे MVL$_1$ **7** तदसत्त्वे तु ] K$_1$L$_1$; तदसत्त्वे MV **8** ॰मयुक्तं ] MVK$_1$; ॰मयुक्ते L$_1$ **9** बाधकाभावज्ञानाधीनं प्रा॰ ] MVL$_1$; बाधकज्ञानाभावा+++ K$_1$ **10** विकल्प्यमानं ] K$_1$; कल्प्यमानं MV L$_1$ **14** यदि ] K$_1$; यदि तु MVL$_1$ **14** ॰श्चिनुयाम ] VK$_1$L$_1$; ॰श्चिनुयामः M **15** विप्रलभ्येमहि ] MVK$_1$; विप्रलभेमहि M$^{ka}$L$_1$

न्यामहे—न निश्चितं तदा प्रामाण्यम्, संशयादेव व्यवहराम इति।

[4.2.1.3.2.2 **वस्तुवृत्तेन संशयः**]

ननु संशयो ऽपि तदा नानुभूयत एव “किमिदं रजतम् उत न रजतम्” इति। अपि तु “रजतम्” इत्येव प्रतीतिः। न हि संशयानाः प्रवर्तन्ते लौकिकाः, किं तु निश्चिन्वन्त एव विषयमिति किमयमननुभूयमान एवारोप्यते संशयः।

मैवम्। एकतरपक्षग्राह्यप्ययं प्रत्ययः तन्निश्चयोपायविरहात्संशयकोटिपतित एव बलाद् भवति। यथा “अस्ति कूपे जलम्” इति भिक्षवो मन्यन्ते, एवम् “रजतम्” इत्येकपक्षग्राह्यपि तदानीं प्रतिभासो वस्तुवृत्तेन संशय एव। यदि हि प्रमाणतयासौ गृह्यते कथं क्वचिद्विसंवादः। अप्रमाणतया तु गृह्यमाणः कथं पुमांसं प्रवर्तयेत्।

उभाभ्यामपि रूपाभ्यामथ तस्यानुपग्रहः।
सो ऽयं संशय एव स्यादिति नः किं प्रकुप्यसि॥

[4.2.1.3.2.3 **अननुभवः**]

---

9 *Nyāyamañjarīgranthibhaṅga* 77.1–4: अस्ति कूपे जलमिति। एतद् ज्ञानमुभयकोटिस्पृक्त्वेनानुत्पद्यमानमपि संवादविसंवादाभावात् संशय इति कल्प्यते। संवादे सम्यग् ज्ञानं स्यात् विसंवादे तु मिथ्या, संशयविपर्ययसम्यग्ज्ञानातिरिक्तस्य चतुर्थस्य ज्ञानात्मनो ऽनभ्युपगमात्तु संशय एव।

---

**1 तदा** ] $K_1$ ; तत्° $MVL_1$  **1 प्रामाण्यम्** ] $MVL_1$ ; प्रामाण्य° $K_1$  **3 ऽपि** ] $MVK_1$ ; ऽपि न $L_1$  **4 रजतम् उत न रजतम्” इति** ] $MK_1L_1$ ; रतजम् इति $M^{kha}V$  **4 अपि तु** ] $MVL_1$ ; +++ $K_1$  **5 निश्चिन्वन्त** ] $MVL_1$ ; निश्चियन्त $K_1$  **6 किमयम°** ] $K_1$ ; किम° $MVL_1$  **7 मैवम्** ] $K_1$ ; om. $MVL_1$  **7 एकतरपक्ष°** ] $K_1$ ; एकतर° $MVL_1$  **8 °कोटि°** ] $MVL_1$ ; ++ $K_1$  **9 मन्यन्ते** ] $VK_1L_1$ ; मन्यन्ते इति M  **9 रजतम्** ] $K_1$ ; रतजमिदम् $MVL_1$  **10 गृह्यते** ] $K_1$ ; गृह्येत $MVL_1$  **11 °संवादः** ] $K_1$ ; °संवदेत् $MVL_1$  **11 तु गृह्य°** ] $MVL_1$ ; +++ $K_1$  **11 पुमांसं** ] $MVK_1$ ; पुंमांसं $L_1$  **13 नः किं** ] $K_1$ ; किं नः $MVL_1$  **13 प्रकुप्यसि** ] $MVK_1$ ; प्रकुप्यति $L_1$

यत्तु नानुभूयते संशय इति। सत्यम्। अननुभूयमानो ऽपि न्यायादभ्यस्ते विषये ऽविनाभावस्मरणवत् परिकल्प्येत, निश्चयनिमित्तस्य तदानीमविद्यमानत्वात्, संशयजननहेतोश्च सामग्र्याः सन्निहितत्वात्। तथा हि यथार्थेतरबोधसाधारणो धर्मो बोधरूपत्वमूर्ध्वत्वादिवत् तदा प्रकाशत एव। न च प्रामाण्याविनाभावी विशेषः कश्चन तदानीमवभाति। तदग्रहणे च समानधर्माधिगमप्रबोध्यमानवासनाधीनतत्सहचरितपर्यायानुभूतविशेषस्मृतिरपि संभवत्येवेतीयं सा संशयजननी सामग्री सन्निहितैवेति कथं तज्जन्यः संशयो न स्यात्।

### [4.2.1.3.2.4 विशेषाग्रहणम्]

ननु प्रमाणभूते प्रत्यये जायमान एव तद्गतो विशेषः परिस्फुरतीति कथं विशेषाग्रहणमुच्यते। भो महात्मन्। कथ्यतां स विशेषः। न हि तं वयमनुपदिष्टं कृशमतयो जानीमः।

### [4.2.1.3.2.4.1 स्पष्टता]

यदि तावत्स्पष्टता विशेषः, शुक्तिकायामपि रजतावभासः स्पष्ट ए-

---

**1 यत्तु नानुभूयते संशय इति**] See section 3.4.2.
**10** Cf. section 3.4.2.
**11** *Tātparyaṭīkā* ad *codanā* 47 (50.14–15): कश्चायं बोधविशेषः, यो ऽत्र परिकल्पितः प्रमाणं नाम।
**14** *Tātparyaṭīkā* ad *codanā* 47 (50.15–16): यदि तावत् स्पष्टता (स्पष्टता]

---

**2 °स्मरणवत्**] $K_1L_1$; °स्मरणात्स MV **2 परिकल्प्येत**] $L_1$; परिकल्प्यते MV; परि++त $K_1$ **4 °तरबोध°**] $K_1$; °तरार्थ° $MVL_1$ **4 °मूर्ध्वत्वादि°**] $MVK_1$; °मूर्ध्वतादि° $L_1$ **6 तदानीमवभाति**] $MVL_1$; तदानीमे+++ $K_1$ **6 °धिगम°**] $MVK_1$; °दिगम° $L_1$ **7 °नवासनाधीन°**] $K_1$; °नवासनाधीना MV; °नवासना $M^{ka}$; °नावासनाधीना $L_1$ **7 °तत्सहचरित°**] $MVL_1$; °तत्सहचारित° $K_1$ **7 °त्येवेतीयं**] $VK_1L_1$; °त्येवेतीयतीयं M **10 प्रमाणभूते**] $MVL_1$; प्रमाणभूते पि $K_1$ **10 जायमान**] $MVL_1$; जा+++ $K_1$ **12 न हि**] $K_1L_1$; न हि तं MV **12 वयमनुप°**] $MVL_1$; °वन्वमु° $K_1$ **14 °त्स्पष्टता**] $MVL_1$; °त् स्फटता $K_1$

व। न हि तत्रानध्यवसायकालुष्यं किंचिदस्ति।

[4.2.1.3.2.4.2 **निष्कम्पता**]

अथ निष्कम्पता, शुक्तिकायामपि रजतावभासो निष्कम्प एव। न ह्यसौ जायमान एवाङ्गुल्यादिवाक्यकरणकबोधवत्कम्पमानो जायते।

[4.2.1.3.2.4.3 **निर्विचिकित्सता**]

अथ निर्विचिकित्सता, शुक्तिकायामपि रजतावभासो निर्विचिकित्स एव, किंस्विदिति कोटिद्वयानवभासात्।

[4.2.1.3.2.4.4 **बाधादर्शनम्**]

---

ms.; **स्पष्टः** ed.), **शुक्तिकायामपि रजताभासः स्पष्ट एव।**; *Nyāyamañjarīgranthibhaṅga* 77.5–6: **यदि तावत् स्पष्टते[ति]। सत्यरजतवदर्थान्तरविवेकेन यत्रार्थः प्रतिभासते स स्पष्टः।**

**3** *Tātparyaṭīkā* ad *codanā* 47 (50.17): **अथ निष्कम्पता, शुक्तिकायामपि रजतावभासो निष्कम्प एव।**; *Nyāyamañjarīgranthibhaṅga* 77.6: **समनन्तरमेव विरुद्धज्ञानान्तरानपसार्यमाणस्वभावो निष्कम्पः।**

**6 निर्विचिकित्सता** ] *Tātparyaṭīkā* ad *codanā* 47 (50.16–17): **अथ निर्विचिकित्सता, शुक्तिकायामपि रजताभासो निर्विचिकित्स एव।**; (50.11–12): **ननु न बोधकत्वमात्रं** (**बोधकत्वमात्रं** ] ms.; **बोधात्मकत्वमात्रं** ed.) **प्रामाण्यम् यद्** (**यद्** ] ms.; **तद्** ed.) **व्यभिचरति। निर्विचिकित्सस्तु बोधविशेषः प्रमाणम् "हस्तो ऽयम्" इति। स चोत्पत्तावेव बोधान्तराद्विलक्षण एव भासत इति तादृशस्य नास्ति व्यभिचारः।**; *Nyāyamañjarīgranthibhaṅga* 77.6–7: **अनाश्वासस्थानं यो न भवति संभाव्यमानार्थत्वात् स निर्विचिकित्सः।**

**6 शुक्तिकायामपि रजतावभासो** ] Cf. *Tātparyaṭīkā* ad *codanā* 47 (50.9–10): **यतो न बोधकत्वं प्रामाण्यम्, अप्रमाणे ऽपि शुक्तिकायां रजतज्ञाने सद्भावात्।**

---

**1 ॰कालुष्यं** ] MV; **॰कालुष्य+** $K_1$; **॰कालुष्ये** $L_1$ **3 रजतावभासो** ] $MK_1L_1$; **रजताभासो** V **4 ॰एवाङ्गुल्यादि॰** ] $L_1$; **॰एवाङ्गुल्यग्रादि॰** MV; **॰एवांगुंल्यादि॰** $K_1$ **4 ॰वाक्यकरणक॰** ] $M^{en}K_1$; **॰वाक्यकरण॰** $MVL_1$ **6 निर्विचिकित्सता** ] $MVL_1$; **निर्विचित्सा** $K_1$ **7 ॰नवभासात्** ] em.; **॰नवमर्शात्** $MVL_1$; **॰नवभा++** $K_1$

अथ यस्मिन् सति बाधा न दृश्यते सो ऽस्य विशेष इति। नन्वेतदेव पृच्छामि कस्मिन् सति बाधा न दृश्यत इति, सर्वावस्थस्य बाधदर्शनात्। न चासौ चिरमपि चिन्तयित्वा विशेषो दर्शयितुं शक्यः।

### [4.2.1.3.2.4.5 स्वविषयाव्यभिचारित्वम्]

अथ स्वविषयाव्यभिचारित्वमेव विशेषः, स तदानीं नावभासत इत्युक्तम्। अपि च यदि तथाविधो विशेषः समस्ति, तर्हि यत्र ज्ञाने ऽसौ न दृश्यते ततः किमिति प्रवर्तते। तद्विशेषदर्शी वा प्रवर्तमानः कथं विप्रलभ्येतेत्युक्तमेतत्।

### [4.2.1.3.2.5 संशयसमर्थनोपसंहारः]

यदयं स्थाणुपुरुषसंशयवदसंवेद्यमानो ऽपि तदानीमस्त्येव बोधे यथार्थेतरसंशयः।

---

**1** *Tātparyaṭīkā* ad *codanā* 47 (50.17–19): **अथ यादृशस्य बाधो न दृष्टः, स बोधविशेषः प्रमाणम्, सर्वावस्थस्य बाधादर्शनात्। ननु तदेव पर्यनुयुक्तम्—कीदृशस्य बाधो न दृष्ट इति।**
**5** *Tātparyaṭīkā* ad *codanā* 47 (50.21–25): **अथ विषयव्यभिचारिताव्यभिचारिते, ते हि विषयव्यभिचारिताव्यभिचारिते किमुत्पत्तौ तस्मिन्नेव विषयवत्प्रतिभासेते, उत बोधान्तरे। न तावत्तस्मिन्, विषयावभासातिरेकेणोत्पत्तावप्रतिभासनात्। प्रतिभासे चैकस्मिन् प्रवृत्तिर् बाधकोत्पत्तिश्च न प्राप्नोति। संवादकबोधाभ्युपगमे ऽप्यनवस्था परतःप्रामाण्यप्रसङ्गश्च।**
**6 इत्युक्तम्** ] See section 4.2.1.1.2.2.
**8 °त्युक्तमेतत्** ] See section 3.1.

---

**1 नन्वे°** ] $MVL_1$; **तन्वे°** $K_1$ **2 बाधा** ] $MVL_1$; **बोधा** $K_1$ **3 विशेषो दर्शयितुं** ] $MK_1L_1$; **विशेषयितुं** $M^{kha}V$ **5 विशेषः, स** ] $MVL_1$; **विशे++** $K_1$ **6 तथाविधो** ] $K_1$; **तथाविधो ऽपि** $MVL_1$ **6 विशेषः समस्ति** ] $MVL_1$; **विशेषमस्ति** $K_1$ **7 दृश्यते** ] $MVK_1$; om. $L_1$ **7 ततः** ] $MVL_1$; **तः** $K_1$ **8 °त्युक्तमेतत्** ] $K_1$; **°त्युक्तम्** $MVL_1$ **10 यदयं** ] $MVK_1L_1$; **तदयं** $M^{en}$ **10 स्थाणुपुरुष°** ] $MM^{en}K_1L_1$; **स्थाणुर्न पुरुषः** $M^{kha}V$ **10 °संशय° ⋯ लोपकः** ] $MK_1L_1$; **°निश्चय° ⋯ लोपकः** $M^{ga}$; om. V **10 °वदसंवेद्यमानो** ] $ML_1$; **°वदस+++मानो** $K_1$ **11 यथार्थेतर°** ] $K_1$; **यथार्थेतरत्व°** $ML_1$

न चासौ कल्प्यमानो ऽपि व्यवहारस्य लोपकः।
तेनैव व्यवहारस्य सिद्धत्वात्सर्वदेहिनाम्॥
अतश्च संशयादेव व्यवहारं वितन्वताम्।
लौकिकानां प्रयोक्तव्या नाभिशापपरंपरा॥

[4.2.1.3.3 प्रामाण्याग्रहणम्]

न च सर्वथा संशयसमर्थने ऽस्माकमभिनिवेशः। प्रामाण्यं तु ज्ञानोत्पत्तिकाले ग्रहीतुमशक्यमिति नः पक्षः। प्रामाण्याग्रहणमेवानध्यवसायस्वभावं संशयशब्देनेह व्यपदेक्ष्यामः।

[4.2.1.4 उपसंहारः]

प्रामाण्याग्रहणं च दर्शितम्, प्रत्यक्षेणानुमानेन वा सता प्रमाणेनात्मनः प्रमाणत्वपरिच्छेदायोगात्। तस्मात्स्वयं प्रामाण्यं गृह्यत इत्येष दुर्घटः पक्षः।

[4.2.2 स्वतः प्रामाण्यं भवति]
[4.2.2.1 कार्यत्वात्]

अथ स्वत एव प्रामाण्यं भवतीत्येष पक्ष आश्रीयते सो ऽप्ययुक्तः, कार्याणां कारणाधीनजन्मत्वात्, प्रामाण्यस्य च कार्यत्वात्। अस्ति हि प्रामाण्यम्, वस्तु च तत्, न च नित्यमिति कार्यमेव तत्, कार्यं च कार्यत्वादेव न स्वतो भवितुमर्हतीति।

---

**4** Cf. section 3.4.3.3.1; *Nyāyamañjarīgranthibhaṅga* 77.8: **अभिशापपरम्परा ‘संशयात्मा विनश्यति’ इत्यादिका।**

---

**4 प्रयोक्तव्या** ] $MVL_1$; **प्रयो++** $K_1$ **4 °परंपरा** ] $K_1L_1$; **°परंम्पराः** MV **7 ग्रहीतु°** ] $VK_1L_1$; **गृहीतु°** M **7 °ग्रहणमे°** ] $MVK_1L_1^{pc}$; **°ग्रहमे°** $L_1^{ac}$ **8 व्यपदेक्ष्यामः** ] $MVL_1$; **व्यपदेक्ष्या+** $K_1$ **10 दर्शितम्** ] $K_1$; **प्रदर्शितम्** $MVL_1$ **10 प्रत्यक्षेणा°** ] $MVK_1$; **प्रत्यक्षेना°** $L_1$ **11 तस्मात्स्वतः प्रामाण्यं** ] $M^{en}K_1$; **तस्मात्स्वयं प्रामाण्यं** $MVL_1$ **15 स्वत एव** ] $K_1$; **स्वतः** $MVL_1$ **15 सो ऽप्ययुक्तः** ] $MVL_1$; **++युक्तः** $K_1$ **17 अस्ति हि** ] $K_1$; **अस्ति च** $MVL_1$

### [4.2.2.2 **सम्यक्कार्यम्**]

अथोत्पत्तौ स्वकारकातिरिक्तगुणानपेक्षित्वमेव प्रामाण्यस्य स्वतोभवनमुच्यते, न पुनरकार्यत्वमेवेति। तदप्यसम्यक्, सम्यग्रूपस्य कार्यस्य गुणवत्कारकव्यतिरेकेणानिष्पत्तेः। द्विविधं हि कार्यं भवति सम्यगसम्यग् वा। तत्र गुणवता कारणेन सम्यक्कार्यमुत्पद्यते, दोषवता त्वसम्यगिति।

निर्दोषं निर्गुणं वापि न समस्त्येव कारणम्।
अत एव तृतीयस्य न कार्यस्यास्ति संभवः॥

सम्यग्ज्ञानोत्पादकं कारकं धर्मि। स्वरूपातिरिक्तस्वगतधर्मसापेक्षोत्पादकमिति साध्यो धर्मः। कारकत्वात्, मिथ्याज्ञानोत्पादककारकवत्।

सम्यग्ज्ञानं वा धर्मि। स्वरूपातिरिक्तस्वधर्मसंबद्धकारकनिष्पाद्यमिति साध्यो धर्मः। कार्यत्वात्, मिथ्याज्ञानवत्।

### [4.2.2.3 **आयुर्वेदागमात्**]

आयुर्वेदागमाच्चेन्द्रियगुणान् प्रतिपद्यामहे। यदमी वैद्याः स्वस्थवृत्तेरप्यौषधोपयोगमुपदिशन्ति तद् गुणोपादानायैव, न दोषशान्तये।

---

**15** Cf. section 3.3.1.2.1.

---

**2 °कातिरिक्त°** ] MV$K_1L_1^{pc}$; **°कातिशय°** $L_1^{ac}$ **2 °नपेक्षित्व°** ] MV$K_1$; **°नपेक्षितत्व°** $L_1$ **3 °त्वमेवेति** ] MV$L_1$; **°त्वमेति** $K_1$ **4 सम्यग्रूपस्य कार्यस्य** ] MV$K_1L_1$; **सद्रूपस्य कार्यस्य** $M^{en}$ **4 द्विविधं हि** ] $K_1L_1$; **द्विविधं** MV **9 °त्पादकं** ] MV$L_1$; **°त्पादकां** $K_1$ **9 कारकं धर्मि** ] M$K_1L_1$; **कारकधर्मि** $M^{kha}$V **10 °सापेक्षोत्पादक°** ] $K_1$; **°सापेक्षं कार्यनिर्वर्तक°** MV; **°सापेक्षं कार्यनिवर्तक°** $L_1$ **12 °स्वधर्म°** ] M$K_1$; **°धर्म°** V$L_1$ **12 °संबद्ध°** ] M$K_1L_1$; **°संबन्धवत्°** V$M^{kha}$ **15 °र्वेदागमाच्चे°** ] M$K_1L_1$; **°र्वेदाच्च** $M^{kha}$V **16 °वृत्तेरप्यौषधोपयोग°** ] $M^{en}K_1$; **°वृत्तेरौषधोपयोग°** MV$L_1$ **16 °मुपदिशन्ति** ] MV$L_1$; **°मुपदन्ति** $K_1$ **16 गुणोपादानायैव** ] $K_1$; **गुणोपयोगायैव** MV$L_1$

दृश्यते च तदुपदिष्टौषधोपयोगादिन्द्रियातिशयः। तद्विषय एव च लोके नैर्मल्यव्यपदेशः, न दोषाभावमात्रनिष्ठ इत्यलं विमर्देन।

### [4.2.2.4 उपसंहारः]

तस्माद्गुत्पत्तौ गुणानपेक्षत्वात् स्वतः प्रामाण्यमिति यद्गुक्तं तदयुक्तम्।

### [4.2.3 स्वकार्यकरणे]

यदपि स्वकार्यकरणे प्रमाणस्य परानपेक्षत्वमुच्यते, तदपि व्याख्येयम्। किं प्रमाणं स्वकार्यकरणे निरपेक्षं सामग्री वा तदेकदेशो वा तज्जन्यं वा ज्ञानमिति।

### [4.2.3.1 सामग्री]

तत्र सामग्र्याः सत्यं स्वकार्यजन्मनि नैरपेक्ष्यमस्ति। न तु तावता स्वतः प्रामाण्यम्, तत्परिच्छेदस्य परायत्तत्वात्।

### [4.2.3.2 तदेकदेशः]

सामग्र्यन्तर्गतकारकस्य कार्ये परापेक्षत्वमपरिहार्यम्, एकस्मात्कारकात्कार्यनिर्वृत्त्यसंभवात्।

### [4.2.3.3 तज्जन्यं ज्ञानम्]

ज्ञानं तु फलमेव न प्रमाणमित्युक्तम्। न च फलात्मनस्तस्य स्वकार्यं

---

**2 नैर्मल्यव्यपदेशः ]** Cf. section 3.3.1.2.2.4.
**6 °मुच्यते ]** See section 3.3.2.
**16 °त्युक्तम् ]** *Nyāyamañjarī* I 188.10: तेन चक्षुरादिर्ज्ञानक्रियामुपजनयतः करणत्वम्, ज्ञानस्य तु फलत्वमेवेति युक्तस्तथा व्यपदेशः।

---

**1 तद्विषय ]** MVL$_1$; तद्विषयं K$_1$ **2 °देशः, न ]** MVK$_1$; °देशो L$_1$ **2 °निष्ठ ]** K$_1$; °प्रतिष्ठ MVL$_1$ **6 यदपि ]** K$_1$; यदपि च MVL$_1^{pc}$; यदिपि च L$_1^{ac}$ **6 प्रमाणस्य ]** MVK$_1$; प्रामाण्यस्य L$_1$ **10 °जन्मनि ]** MVK$_1$; °जन्म° L$_1$ **13 कार्ये ]** K$_1$; स्वकार्ये MVL$_1$ **13 एकस्मा° ]** MVL$_1$; एतस्मा° K$_1$ **14 °रकात्कार्य° ]** MVL$_1$; °रकार्य° K$_1$ **14 °निर्वृत्त्यसंभवात् ]** K$_1$; °निर्वृत्त्यभावात् MVL$_1$ **16 तु ]** K$_1$; om. MVL$_1$

किंचिदस्ति, यत्र सापेक्षत्वमनपेक्षत्वं वास्य चिन्त्येत। पुरुषप्रवृत्त्यादौ तु तदिच्छाद्यपेक्षत्वं विद्यत एवेति यत्किंचिदेतत्।

[4.2.4 न स्वतः प्रामाण्यनिश्चये]

यदपि प्रामाण्यनिश्चये नैरपेक्ष्यमभ्यधायि तदपि न सांप्रतम्। प्रामाण्यनिश्चयस्य हि द्वयी गतिः—नास्तित्वं वा कारणापेक्षिता वा। न पुनर् अस्ति च प्रामाण्यनिश्चयः कारणानपेक्षश्चेति शक्यते वक्तुम्।

तत्र प्रथमप्रवर्तकप्रतिभासप्रसवसमये तावन्नास्त्येव प्रामाण्यनिश्चय इत्युक्तम्। न हि नीलग्राहिणा प्रमाणेन नीलस्वरूपमिव प्रामाण्यमपि तदानीं निश्चेतुं शक्यत इति। कालान्तरे तु प्रामाण्यनिश्चयः सत्यमस्ति, न तु तत्र नैरपेक्ष्यम्, प्रवृत्तिसामर्थ्याधीनत्वात् तन्निश्चयस्य।

ननु क्षणिकत्वात्कालान्तरे ज्ञानमेव नास्ति। कस्य प्रामाण्यं निश्चिनुमः। शिशुचोद्यमेतत्। अप्रामाण्यमपि बाधकप्रत्ययादिना कालान्तरे कस्य निश्चिनुमः, क्षणिकत्वेन ज्ञानस्यातीतत्वात्।

अतिक्रान्तस्यापि स्मर्यमाणस्य ज्ञानस्य तदुत्पादकस्य वा वर्तमानस्य कारणचक्रस्येति चेत्। प्रामाण्यनिश्चये ऽपि समानो ऽयं पन्थाः।

---

**2 तदिच्छाद्यपेक्षत्वं** ] See section 3.3.2: **प्रवृत्त्यादेः पुरुषेच्छानिबन्धनत्वात्।**
**8 इत्युक्तम्** ] See section 4.2.1.

---

**1 °पेक्षत्वं** ] MVL$_1$; **°पेक्षत्व** K$_1$ **1 चिन्त्येत** ] MVL$_1$; **चिन्त्यते** K$_1$ **5 °निश्चयस्य हि** ] MVK$_1$; **°निश्चयस्य** L$_1$ **5 नास्तित्वं वा** ] K$_1$; **नास्तित्वम्** MVL$_1$ **5 वा** ] MVK$_1$L$_1$; om. M$^{ka}$ **6 न पुनर् अस्ति च** MV; **नरस्ति च** K$_1$; **न पुनरस्ति** L$_1$ **6 कारणा°** ] MVK$_1$L$_1$; **कारणता°** M$^{ka}$ **7 तत्र** ] MVK$_1$; **अत्र** L$_1$ **8 नील°** ] MVK$_1$L$_1$; **लीन°** M$^{kha}$ **9 प्रामाण्यमपि** ] K$_1$; **स्वप्रामाण्यमपि** MVL$_1$ **9 निश्चेतुं** ] MVK$_1$; **निश्चितुं** L$_1$ **9 तु** ] K$_1$L$_1$; **तत्°** MV **12 °लान्तरे** ] MVL$_1$; **°लान्तर°** K$_1$ **15 ज्ञानस्य** ] MK$_1$L$_1$; om. M$^{ka}$M$^{kha}$V **15 तदुत्पादकस्य** ] MK$_1$L$_1$; **तदुत्पादस्य** M$^{kha}$V **16 कारण°** ] K$_1$; **कारक°** MVL$_1$

[4.3 परतःप्रामाण्यसिद्धिः]

[4.3.1 परोक्तदोषोद्धारः]

यत्पुनः कालान्तरे तन्निश्चयकरणे दूषणमितरेतराश्रयत्वं वा मुण्डितशिरसो नक्षत्रान्वेषणवद्वैयर्थ्यं वेति वर्णितम्।

[4.3.1.1 नेतरेतराश्रयं चक्रकं वा]

तत्र दृष्टे विषये प्रामाण्यनिश्चयपूर्विकायाः प्रवृत्तेरनभ्युपगमान्नेतरेतराश्रयं चक्रकं वा। दृष्टे विषये ह्यनिर्णीतप्रामाण्य एवार्थसंशयात्प्रवृत्तिरूपमनर्थसंशयाच्च निवृत्त्यात्मकं व्यवहारमारभमाणो दृश्यते लोकः। एतदेव युक्तमित्युक्तम्। न प्रामाण्यनिश्चयपुरस्सरं प्रवर्तनमिति कुत इतरेतराश्रयम्।

[4.3.1.2 न वैयर्थ्यम्]

वैयर्थ्यं तु दृष्टे विषये सत्यमिष्यते। किं तु तत्र प्रवृत्तिसामर्थ्येन प्रामाण्यं निश्चिन्वन्नाप्तोक्तत्वस्य हेतोः प्रामाण्येन व्याप्तिमवगच्छतीत्यदृष्टविषयोपयोगिवेदादिप्रमाणप्रामाण्यपरिच्छेदे पारंपर्येणोपायत्वात् स्वविषये व्यर्थो ऽप्यसौ तत्र सार्थकतामवलम्बत इत्यदोषः।

[4.3.2 प्रवृत्तिसामर्थ्यम्]

---

**3 ॰मितरेतराश्रयत्वं** ] See section 3.3.3.3.4.
**4 मुण्डितशिरसो नक्षत्रान्वेषण॰** ] See section 3.3.3.3.3.2.
**7 ॰न्नेतरेतराश्रयं** ] See section 3.3.3.3.4.
**7 चक्रकं** ] See section 3.3.3.1.2.
**9 ॰त्युक्तम्** ] See section 4.1.
**12 वैयर्थ्यं** ] See section 3.3.3.1.2 and 3.3.3.3.3.2.

---

**4 मुण्डित॰** ] $MVK_1$; **मण्डित॰** $L_1$ **4 ॰शिरसो** ] $K_1$; **॰शिरो॰** $MVL_1$ **4 ॰षणवद्वै॰** ] $MVL_1$; **॰षणवच्च वै॰** $K_1$ **4 ॰यर्थ्यं वेति** ] $MVL_1$; **॰य्यर्थ्यमिति** $K_1$ **6 तत्र** ] $K_1$; **तत्रा॰** $MVL_1$ **6 ॰निश्चय॰** ] $MVL_1$; **॰निश्चये** $K_1$ **6 ॰रनभ्युपगमा॰** ] $K_1$; **॰रभ्युपगमा॰** $MVL_1$ **10 ॰राश्रयम्** ] $MVL_1$; **॰राश्रय** $K_1$ **15 व्यर्थो ऽप्यसौ** ] $MVL_1$; **व्यसौ** $K_1$ **15 तत्र सार्थक॰** ] $MVL_1$; **तत्रार्त्थक॰** $K_1$

किं पुनरिदं प्रवृत्तिसामर्थ्यं नाम यतः प्रामाण्यनिश्चयमाचक्षते नैयायिकाः।

[4.3.2.1 **भाष्यकारनिर्णयः**]

उच्यते। पूर्वप्रत्ययापेक्षोत्तरा संवित् प्रवृत्तिसामर्थ्यं विशेषदर्शनं वेति पूर्वाचार्यैस्तत्स्वरूपमुक्तम्। तत्पुनर्नातीव हृदयङ्गममिति भाष्यकृतैव "समीहा प्रवृत्तिरित्युच्यते, सामर्थ्यं पुनरस्याः फलेनाभिसंबन्धः" इति वदतार्थक्रियाख्यफलज्ञानमेव प्रवृत्तिसामर्थ्यमिति निर्णीतम्।

[4.3.2.2 **अर्थक्रियाज्ञानस्य विशेषः**]

यत्पुनरर्थक्रियाज्ञानस्यापि पूर्वस्मात्को विशेषः। तस्यापि चान्यतः प्रामाण्यनिश्चयापेक्षायामनवस्थेत्युक्तम्।

---

**4** *Nyāyamañjarīgranthibhaṅga* 77.9–14: पूर्वप्रत्ययापेक्षेति। व्यभिचारिता हि ज्ञानस्य दोषहेतुका, ते च सन्निकर्षविप्रकर्षापेक्षाः कारणं मिथ्याधियः। तत्र यदा विप्रकर्षाद् दोषेभ्यः मिथ्याधीस्तदाऽसौ सन्निकर्षान्निवर्तते, मरीचिष्विव दूराज्जाता जलधीः सन्निकर्षात्तु मरीचिधीरेव; यत्र पुनः सन्निकर्षविप्रकर्षयोरपि तथात्वं तत्र सम्यक्त्वमेव। इतीयं सा पूर्वप्रत्ययापेक्षोत्तरा संवित्। संशयो हि साधर्म्यनिबन्धनो ज्ञाने विशेषदर्शनान्निवर्तते स्थाणाविव करपादादिविशेषदर्शनादित्यभिप्रायेणोक्तम्—विशेषदर्शनं वेति।

**5** *Nyāyamañjarīgranthibhaṅga* 77.14–18: नातीव हृदयङ्गममिति। उत्तरस्या अपि संविदः कदाचिदसत्यर्थे समुत्पादाशङ्कासम्भवाद् विशेषदर्शनस्य चासत्यपि विशेष इति। तथा च विशेषदर्शने ऽपि संशीतिः क्वचित् कराद्यवयवावलोकरूपे, तथा हि—'तस्याः पाणिरयं न कोमलदलश्चलत्यत्राङ्गुलिपल्लवः' इत्यादौ संशय्य पश्चान्निश्चिनुते।

**6** समीहा ··· °संबन्धः ] *Nyāyabhāṣya* ad 1.1.1 (1.8–9).

**9** Cf. Section 3.3.3.3.3.1: **कश्चार्थक्रियाज्ञानस्य पूर्वस्माद्विशेषः।**

**10** °त्युक्तम् ] See section 3.3.3.3.3.1.3.

---

**1** °सामर्थ्यं ] $MVK_1$; °सामार्थ्यं $L_1$ **4** वेति ] $MVK_1$; वति $L_1$ **9** चान्यतः ] $MVK_1L_1$; नान्यन्तः $M^{ka}$ **10** °ण्यनिश्चया° ] $MVL_1$; °ण्या° $K_1$ **10** °पेक्षायाम° ] $MVK_1$; °पेक्षाम° $L_1$

[4.3.2.2.1 अपरीक्षणीयप्रामाण्यत्वम्]

तदपि सकलप्राणभृत्प्रतीतिसाक्षिकव्यवहारविरोधित्वादसंबद्धाभिधानम्, अपरीक्षणीयप्रामाण्यत्वादर्थक्रियाज्ञानस्य। प्रवर्तकं हि पूर्वज्ञानं प्रवृत्तिसिद्धये परीक्षणीयप्रामाण्यं वर्तते। फलज्ञाने तु सिद्धप्रयोजनत्वात्प्रामाण्यपरीक्षापेक्षैव नास्तीति कुतो ऽनवस्था।

[4.3.2.2.2 संशयाभावः]

संशयाभावाद्वा तत्प्रामाण्यविचाराभावः। प्रवर्तकं हि प्रथममुदकज्ञानमविद्यमाने ऽपि नीरे मिहिरमरीचिषु दृष्टमिति तत्र संशेरते जनाः। अर्थक्रियाज्ञानं तु सलिलमध्यवर्तिनां भवत्तदविनाभूतं भवतीति न तत्र संशयः। तदभावान्न तत्प्रामाण्यविचारः, विचारस्य संशयपूर्वकत्वात्।

[4.3.2.2.3 पर्यालोचनप्रबन्धः]

विशेषदर्शनाद्वा फलज्ञाने प्रामाण्यनिश्चयः। कः पुनर्विशेष इति चेत्। यो ऽयं शौचाचमनमज्जनामरपितृतर्पणपटक्षालनक्षामतापनोदनविनोदनाद्यनेकप्रकारनीरपर्यालोचनप्रबन्धः। न ह्ययमियान् का-

**3** Cf. *Tātparyaṭīkā* ad *codanā* 76: न च तत्र संवादापेक्षा। अर्थक्रियार्थी पूर्वस्मात्प्रवर्तमानो व्यभिचारदर्शनेन संवादमपेक्षते। अर्थक्रियाज्ञानस्य तु पुरुषार्थत्वादुत्पन्ने तस्मिन्न काचिदपेक्षा।
**14** Cf. section 3.3.3.3.3.1.1.

**2** °साक्षिक° ] $MVL_1$; °साक्षि° $K_1$ **3** हि ] $K_1$; न MV; om. $L_1$ **4** पूर्व° ] $K_1$; सर्व° MV; सर्वं $L_1$ **4** ज्ञानं ] $MVK_1$; ज्ञानं हि $L_1$ **4** °प्रामाण्यं ] $MVK_1$; °प्रामाण्ये $L_1$ **7** °भावाद्वा तत्प्रा° ] $MVL_1$; °भावात्तत्र प्रा° $K_1$ **9** अर्थक्रियाज्ञानं तु ] $MVL_1$; om. $K_1$ **9** सलिलमध्यवर्तिनां ] $M^{en}VK_1L_1$; सलिलमध्यर्तिनां M **9** °भूतं ] $K_1$; °भूतमेव $MVL_1$ **10** तत्प्रामाण्य° ] $K_1$; तत्र प्रामाण्य° $MVL_1$ **13** कः पुनर्विशेष ] $VK_1$; कः पुनरयं विशेष M; का पुनर्विशेष $L_1$ **14** °मज्जना° ] $MVK_1$; °मज्ञाना° $L_1$ **14** °पटक्षालनक्षाम° ] $K_1$; °पटक्षालनश्रम° MV; °पटक्षालणक्षम° $L_1$ **15** °नीरपर्यालोचन° ] $MVK_1L_1$; °नीरकार्यालोचन° $M^{en}$ **15** °प्रबन्धः ] $MVL_1$; °प्रबन्धा $K_1$

र्यकलापो मिथ्याज्ञानात्प्रवृत्तस्य क्वचिदपि दृष्टः।

स्वप्ने ऽप्यस्य प्रबन्धस्य दर्शनमस्तीति चेत्। न, स्वप्नदर्शनविसदृशविस्पष्टजाग्रदवस्थाप्रत्ययस्य संवेद्यत्वात्। "एषो ऽस्मि, जागर्मि, न स्वपिमि" इति स्वप्नविलक्षणमनिद्रायमाणमानसः प्रत्यक्षमेव जाग्रत्समयं सकलो जनश्चेतयते। न च तस्मिन्नवसरे सलिलमन्तरेणैताः क्रियाः प्रवर्तमाना दृश्यन्त इति तद्विशेषदर्शनात् सुज्ञानमर्थक्रियाज्ञानप्रामाण्यम्।

[4.3.2.2.4 कारणपरीक्षा]

कारणपरीक्षातो वा तस्मिन् प्रामाण्यं निश्चेष्यामः। यथोक्तं भवद्भिरेव "प्रयत्नेनान्विच्छन्तो न चेद्दोषमवगच्छेम, तत्प्रमाणाभावाद् अदुष्टमिति मन्येमहि" इति। तथा हि विषयस्य चलत्वसादृश्यादिदोषविरहः, आलोकस्य मलीमसत्वादिकालुष्यवैकल्यम्, अन्तःकरणस्य निद्राद्यदूषितत्वम्, आत्मनः क्षुत्प्रकोपाद्यनाकुलत्वम्, ईक्षणयुगलस्य तिमिरपटलादिविकलत्वम् इत्यादि स्वयं च कार्यद्वारेण परोपदेशेन च सर्वं सुज्ञानम्। अतो निरवद्यकारणजन्यत्वात् प्रमा-

---

**2 स्वप्ने** ] See section 3.3.3.3.3.1.1.

**10** *Śābarabhāṣya* ad 1.1.3–5 (1.1.4a), F 26.18–19: **प्रयत्नेनान्विच्छन्तो न चेद्दोषमुपलभेमहि, प्रमाणाभावाददुष्टमिति मन्येमहि।**

**11** *Nyāyamañjarīgranthibhaṅga* 77.19: **विषयस्य चलत्वेति। चलत्वं मरीचिकादौ, सादृश्यं शुक्तिकादौ।**

---

**3 °दर्शन°** ] $K_1$; **°दशा°** $MVL_1$ **4 °निद्रायमाणमानसः** ] $MK_1$; **°निद्रायमाणः मानसः** $M^{kha}$; **°निद्रायमाणः** V; **°निद्रायमानमानसः** $L_1$ **5 जाग्रत्समयं सकलो** ] $MVK_1L_1$; **जाग्रत्समये स्वयं सकलो** $M^{en}$ **6 प्रवर्तमाना** ] $MVK_1L_1$; **वर्तमाना** $M^{kha}$ **6 °दर्शनात्** ] $MVK_1$; **°दर्शना** $L_1$ **10 प्रयत्नेनान्विच्छन्तो न चेद्दोष°** ] $MVL_1$; **न चेत् प्रयत्नेनान्विच्छन्तो दोष°** $K_1$ **10 तत्प्रमाणा°** ] $MVL_1$; **तत्प्राणा°** $K_1$ **11 तथा** ] $MVL_1$; **यथा** $K_1$ **12 °कालुष्य°** ] $K_1$; **°कारण°** $MVL_1$ **13 निद्राद्य°** ] $MVK_1$; **निद्राप°** $L_1$ **13 क्षुत्प्रको°** ] $MVK_1L_1$; **क्षुत्पिपासाप्रको°** $M^{en}$

णमर्थक्रियाज्ञानमिति विद्मः।

यद्येवम्, प्रथमे प्रवर्तक एव प्रत्यये कस्मात्कारणपरीक्षैवेयमित्थं न क्रियते। किमर्थक्रियाज्ञानेन।

आयुष्मन्। आद्ये ऽपि ज्ञाने कारणपरीक्षायां क्रियमाणायां कः प्रमादः। किमेवं सति तव स्वतः प्रामाण्यं सिध्यति, मम वा परतः प्रामाण्यमपहीयते। किं तु लोकः प्रवर्तकज्ञानानन्तरं फलप्राप्तिं प्रति यथा सोद्यमो दृश्यते, न तथा तत्कारणपरीक्षां प्रतीति फलज्ञानमेवेत्थं परीक्ष्यते। आद्यस्य हि ज्ञानस्य फलज्ञानादेव प्रामाण्यसिद्धिः। कश्च नाम निकटमुपायमुपेक्ष्य दूरं गच्छेदिति।

[4.3.2.2.5 **अव्यभिचारित्वदर्शनम्**]

अथवा संशयोत्पत्तिसामर्थ्यादेव याथार्थ्यनिश्चयः फलज्ञाने लप्स्यते। संशयो हि नाम द्वैविध्यदर्शनाद्विना न भवत्येव। न हि स्थाणुपुरुषसाहचर्यमूर्ध्वताख्यस्य धर्मस्य यो न जानाति स तं दृष्ट्वा “स्थाणुर्वा स्यात् पुरुषो वा” इति संशेते। एवमूर्ध्वत्ववद् बोधरूपत्वस्य व्यभिचारित्वाव्यभिचारित्वाभ्यां सहदर्शनमवश्याश्रयणीयम्, अन्यथा तद्विषयसंशयानुत्पादात्। अतः पूर्वमव्यभिचारित्वदर्शनसिद्धये य-

---

**14 बोधरूपत्व॰** ] Cf. section 4.2.1.3.2.3.
**16** *Nyāyamañjarīgranthibhaṅga* 77.20–22: **अतः पूर्वमव्यभिचारित्वदर्शने सिद्ध**

---

**2 कस्मा॰** ] MVL$_1$; **तस्मा॰** K$_1$ **3 ॰क्षैवेयमित्थं** ] MK$_1$; **॰क्षैवेयं** VL$_1$ **3 किमर्थ॰** ] K$_1$L$_1$; **किमर्थं** MV **4 ॰ज्ञानेन। आयुष्मन्** ] K$_1$L$_1$; **॰ज्ञाने? न—आयुष्मन्** MV **5 तव स्वतः** ] K$_1$; **स्वतः** MVL$_1$ **5 सिध्यति** ] K$_1$L$_1$; **सिद्ध्यति तव** MV **7 ॰परीक्षां** ] MVK$_1$L$_1^{pc}$; **॰परीक्षायां** L$_1^{ac}$ **7 प्रतीति** ] K$_1$; **प्रति** MVL$_1$ **9 दूरं** ] MVL$_1$; **दूरा** K$_1$ **11 अथवा** ] MK$_1$; **अथ** VL$_1$ **11 याथार्थ्य॰** ] K$_1$; **यथार्थेतरत्व॰** M; **यथार्थ॰** VL$_1$ **11 फलज्ञाने** ] K$_1$L$_1$; **फलज्ञानेन** MV **13 यो न** ] MVK$_1$L$_1^{pc}$; **यो** L$_1^{ac}$ **14 वा” इति** ] MVK$_1$; om. L$_1$ **14 बोध॰** ] MK$_1$L$_1$; **बाध॰** M$^{kha}$V **15 व्यभिचारित्वा॰** ] MVK$_1$L$_1^{pc}$; **व्यभिचारादित्वा॰** L$_1^{ac}$ **15 ॰श्याश्रयणीय॰** ] K$_1$; **॰श्यमाश्रयणीय॰** MV; **॰श्यमाश्रणीय॰** L$_1$ **16 ॰नसिद्धये** ] K$_1$; **॰ने सिद्धे** MVL$_1$

स्तदा तत्परिच्छेदोपायः स पश्चादपि भविष्यतीति सर्वथा सिध्यत्यव्यभिचारित्वनिश्चयः।

## [4.3.2.2.6 विशेषप्रतिभासः]

अनिश्चितप्रामाण्यादपि वा फलज्ञानात्प्रवर्तकस्य प्रामाण्यनिश्चयो युक्तः, न स्वतः, उत्पत्तौ प्रमाणतदाभासयोर्विशेषाग्रहणात्, फलज्ञाने च तद्विशेषप्रतिभासात्।

यत्तु विशेषज्ञानमपि निश्चितप्रामाण्यमनिश्चितप्रामाण्यं वेति विकल्प्यानवस्थापादनम् अप्रतिपत्तिपर्यन्तताकथनं वा, तद् दृष्टविरुद्धत्वात् प्रलापमात्रम् इत्यलम् अलीककुविकल्पकलापनिर्मथनोदितदुरामोदास्वादनेन।

## [4.3.2.3 उपसंहारः]

स्थितमेतत्—अर्थक्रियाज्ञानात्प्रामाण्यनिश्चय इति। तदुक्तम् "प्र-

---

इति। किञ्चित् फलज्ञानमव्यभिचारि दृष्टम् किञ्चिच्च व्यभिचारि यदा तदा तृतीये ज्ञाने संशयः। तत्र यदव्यभिचारि दृष्टं तस्य यथाऽव्यभिचारित्वग्रहस्तथाऽस्यापि इति भावः।

**7** *Nyāyamañjarīgranthibhaṅga* 77.23–25: यत्तु तद्विशेषज्ञानमपीति। अर्थक्रियायां यद्विशेषज्ञानांशे चाचमनादिकार्यकलापज्ञानं प्रागुदाहृतं तदपि ज्ञानत्वादन्यतो निश्चितप्रामाण्यमिति तन्निश्चायकस्याप्यन्यतः प्रामाण्यनिश्चय इत्यनवस्था।

**7** See section 3.3.3.3.3.2.

**8** *Nyāyamañjarīgranthibhaṅga* 77.25–78.2: अर्थक्रियाज्ञानप्रामाण्याद्वा तत्प्रामाण्यनिश्चये इतरेतराश्रयत्वम्, तत्प्रामाण्यादर्थक्रियाज्ञान[प्रामाण्यमर्थक्रियाज्ञान]प्रामाण्याच्च तत्प्रामाण्यम्। एतदेव 'अप्रतिपत्तिप्रहतताकथनं वा' इत्यनेनोक्तम्, इतरेतराश्रयत्वे हि एकाप्रतिपत्तावितराप्रतिपत्तिरिति।

---

**1** भविष्यतीति ] MVK$_1$L$_1^{pc}$; भविष्यतिती L$_1^{ac}$ **5** न स्वतः ] K$_1$; न तु स्वतः MVL$_1$ **5** °र्विशेषा° ] MK$_1$L$_1$; °विशेष° M$^{kha}$V **5** फलज्ञाने ] MVK$_1$; फलज्ञानं L$_1$ **7** विशेषज्ञानमपि ] K$_1$; विशेषज्ञानं MVL$_1$ **8** विकल्प्या° ] MVL$_1$; विकल्पा° K$_1$ **8** °पर्यन्तता° ] M$^{ka}$L$_1$; °प्रहतता° MV; °पर्यतता° K$_1$ **8** दृष्ट° ] MK$_1$; दृष्टे VL$_1$ **9** °लम् अलीककु° ] K$_1$; °लमलीकोक्त° MVL$_1$ **12** तदुक्तम् ] K$_1$; तदिदमुक्तम् MVL$_1$

माणतो ऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्” इति। तस्मादप्रामाण्यवत्प्रामाण्यमपि परापेक्षमित्यतः “द्वयमपि परतः” इत्येष एव पक्षः श्रेयान्।

[4.4 **अभ्यस्ते विषये स्वतःप्रामाण्यमिति पक्षे दूषणम्**]

यत्तु कश्चित्प्राज्ञोमानी वदति “अभ्यस्ते विषये स्वतः प्रामाण्यम्, अनभ्यस्ते तु परतः” इति।

सो ऽयम् “अभ्यस्ते विषये” इति च ब्रवीति स्वतश्च प्रामाण्यं मन्यत इति स्वयमेवात्मानं वञ्चयमानं न चेतयते। अभ्यासो नाम पुनःपुनःप्रयोगः क्रियाभ्यावृत्तिः। विषयस्य चाभ्यस्तता भूयोभूयःप्रतिपत्तिः। अतश्च स्वशरीरग्रहे निजगृहकुड्यस्तम्भादिप्रतिभासे

---

**1** प्रमाणतो ··· °वत्प्रमाणम् ] *Nyāyabhāṣya* ad 1.1.1 (1.6); *Nyāyamañjarīgranthibhaṅga* 78.2–4: प्रमाणतो ऽर्थप्रतिपताविति। प्रमाणादर्थप्रतिपत्तिस्ततः प्रवृत्तेश्च सामर्थ्यं फलाभिसम्बन्धस्ततो ऽर्थवत् प्रमाणं ज्ञायते, अर्थसहकारित्वेन ज्ञायते प्रमाणतया ज्ञायत इत्यर्थः।
**5** See section 3.3.3.3.3.3.
**9** *Nyāyamañjarīgranthibhaṅga* 78.5–6: प्रयोगक्रियाभ्यावृत्तिरिति। यथा ‘द्विर्भुक्तः’ इति भोजनस्य या प्रयोगक्रियाऽनुष्ठानसम्पादनं तस्याभ्यावृत्तिः पौनःपुन्यम्।
**10** Cf. *Tattvasaṁgrahapañjikā* 944.16–18: यस्तु मन्यते—अभ्यासवत्यामपि प्रवृत्तौ ताद्रूप्यलक्षणलिङ्गदर्शनादनुमानत एवार्थप्रापणशक्तिलक्षणप्रामाण्यनिश्चय इति सर्वत्र परतःप्रामाण्यावसायो न क्वचिदेव स्वत इति।

---

**2** °प्रामाण्यवत्प्रामाण्यमपि ] $MK_1^{pc}L_1$; °प्रामाण्यमपि $M^{kha}V$; °प्रामाण्यवत्प्रामाण्यमपि च $K_1^{ac}$ **2** परापेक्ष° ] $MK_1L_1$; परोक्ष° $M^{kha}V$ **2** इत्येष ] $MVK_1$; एत्येष $L_1$ **5** °त्प्राज्ञोमानी ] $L_1$; °त्प्राज्ञमानी MV; °त्प्राज्ञामानी $K_1$ **5** वदति ] $MVK_1$; वदिति $L_1$ **7** च ब्रवीति ] $MVL_1$; हि ब्रवीति $K_1$ **8** वञ्चयमानं ] $MVK_1L_1$; वाच्यमानं $M^{kha}$ **8** अभ्यासो ] $K_1$; अभ्यासो हि $MVL_1$ **9** क्रियाभ्या° ] $VK_1L_1$; क्रियाया अभ्या° M **9** चा° ] $MVL_1$; वा° $K_1$ **10** °यःप्रतिपत्तिः ] $K_1$; °यःप्रवृत्तिः $MVL_1$ **10** °गृहकुड्य° ] $MVL_1$; °कुड्यगृह° $K_1$

वा सहस्रकृत्वःप्रवृत्तसंवादिज्ञानजन्मना प्रामाण्यनिश्चय उक्तो भवति, न स्वतः। अभ्यस्ततैवान्यथा न भवेदिति यत्किंचिदेतत्। तस्मात्परत एव सर्वत्र प्रामाण्यमिति सिद्धम्।

### [4.5 प्रमाणपरीक्षणम्]

यत्पुनः कैश्चिच्चोद्यते। न प्रमाणानां परीक्षणमुपपद्यते। तद्धि प्रमाणैः क्रियेताप्रमाणैर्वा। प्रमाणैरपि परीक्षितैरपरीक्षितैर्वा। तत्र नाप्रमाणैः प्रमाणपरीक्षणं शक्यक्रियम्। प्रमाणैरप्यपरीक्षितैस्तत्करणे वरं व्यवहार एव तादृशैः क्रियताम्। किं परीक्षणेन। परीक्षितैस्तु तत्परीक्षणमपर्यवसितम्, अनवस्थाप्रसङ्गादित्यादि।

तदप्युक्तेन न्यायेन परिहृतं भवति, दृष्टे विषये प्रमाणपरीक्षां विनैव व्यवहारात्, अदृष्टे तु तत्परीक्षाया अवश्यकर्तव्यत्वादुपपत्तेश्चेति।

### [5 उपसंहारः]

---

**6** *Nyāyamañjarīgranthibhaṅga* 78.7–9: परीक्षितैस्तु तत्परीक्षाकरणमिति। यैः प्रमाणैः परीक्षितैः परीक्षा क्रियते तेषामपि परीक्षितानां प्रमाणानां परीक्षाकारीणि प्रमाणानि अप्रमाणानि वा। अप्रमाणैः परीक्षाकरणमयुक्तम्, प्रमाणैश्च तेषामपि प्रामाण्यपरीक्षणमन्यत इति अनवस्था।
**10 ॰प्युक्तेन** ] See section 4.1, etc.

---

**1 वा सहस्र॰** ] MV$K_1L_1$; **नासहस्र॰** $M^{ka}$ **1 ॰प्रवृत्त॰** ] M$K_1L_1$; **॰प्रवृत्ति॰** $M^{kha}$V **1 ॰संवादि॰** ] $K_1$; **॰संवाद॰** MV$L_1$ **2 न स्वतः। अभ्यस्ततैवान्यथा** ] $L_1$; **स्वतो ऽभ्यस्तत्वं चान्यथा** MV; **न स्वतः अभ्यस्त+वान्यथा** $K_1$ **3 तस्मात्परत एव सर्वत्र** ] $K_1^{pc}$; **तस्मात्परतः** ] MV$L_1$; **तस्मादेतत्परत एव सर्वत्र** $K_1^{ac}$ **5 कैश्चि॰** ] MV$K_1$; **कश्चि॰** $L_1$ **5 न प्रमाणानां** ] $K_1$; **प्रमाणानां न** MV; **प्रमाणानां** $L_1$ **6 ॰परीक्षितैर्वा** ] MV; **॰प++++** $K_1$; **॰परीक्षितैव** $L_1$ **7 नाप्रमाणैः** ] $K_1$; **न नाम अप्रमाणैः** M; **न नाम प्रमाणैः** $M^{ka}$; **न नाम** $M^{kha}$V; **नाम प्रमाणैः** $L_1$ **9 तत्परीक्षण॰** ] $K_1$; **तत्परीक्षाकरण॰** MV$L_1$ **9 ॰प्रसङ्गादित्यादि** ] V$K_1L_1$; **॰प्रसङ्गात्** M **10 तदप्युक्तेन** ] MV$K_1$; **तदस्य युक्तेन** $L_1$ **10 प्रमाण॰** ] MV$L_1$; **प्राण॰** $K_1$ **11 व्यवहारात्** ] MV$K_1$; **व्यहारात्** $L_1$ **11 तत्परीक्षाया** ] $K_1$; **परीक्षाया** MV$L_1$

तस्माददृष्टपुरुषार्थपथोपदेशि
　　मानं मनीषिभिरवश्यपरीक्षणीयम् ।
प्रामाण्यमस्य परतो निरणायि चेति
　　चेतःप्रमाथिभिरलं कुविकल्पजालैः ॥

---

**3** *Nyāyamañjarīgranthibhaṅga* 78.10: प्रामाण्यमस्य निरणायि निश्चितम् ।

---

**1** °पथो° ] $K_1$ ; °पदो° $MVL_1$